G.1

[illegible] -

[illegible]

[illegible]

কলিকাতা

৫/৮/১৯৮২

# THE ARTHAŚĀSTRA OF KAUṬILYA —A NEW APPROACH

*By*

PROF. Dr. ASOKE CHATTERJEE ŚĀSTRĪ,
M.A. (Double), D.Phil.. D.Ger. Ph.D., D.Lit., Mahopādhyāya, Pañcatīrtha, Vācaspati, Griffith Prizeman (Double); Umesh-candra Vidyāratna Prizeman (Triple).

Department of Sanskrit, Calcutta University

1982

Published by
Sanskrit Book Depot
28/1, Bidhan Sarani
Calcutta-700 006

Price : Rs. 40·00

Printed by
Suresh Dutta
Modern Printers
12, Ultadanga Main Road
Calcutta-700 067

# कौटिलीयार्थशास्त्रचर्चा

डा. अशोक चटर्जी शास्त्री, एम. ए (डवल), डी. फिल., डी. जर., पी. एच. डी.,
डी. लिट., महोपाध्याय, पञ्चतीर्थ, वाचस्पति, ग्रिफिथ प्राइज मेन (डवल),
उमेशचन्द्र विद्यारत्न प्राइज मेन (ट्रिप्ल)

संस्कृत विभाग
कलिकाता विश्वविद्यालय

१९८२

प्रकाशकः
संस्कृत बुक डिपो
२८।१, विधान सरणि
कलिकाता-७००००६

मूल्यम्—४०'०० रुप्यकाणि

मुद्रकः
सुरेश दत्त
मडार्न प्रिन्टार्स
१२, उल्टाडाङ्गा मेन रोड
कलिकाता-७०००६७

## PREFACE

The *Arthaśāstra* of *Kauṭilya* is a piece of work of exceptional interest and value. It is at present accepted as the famous compendium of Ancient Indian Political Thoughts and Activities. Since its discovery by R. Shamashastry in 1909 quite a large number of scholars both Indian and foreign have wholeheartedly devoted themselves to the study of this epoch-making treatise. Although they appear to be divided in their opinions with regard to the authenticity, genuineness or antiquity of this work, they are rigidly unanimous on one particular point. All believe that it is indeed the greatest work on politics and political activities of Ancient India. It throws a plethora of light on many political problems which the Indians had to face in olden days. But apart from it, its contribution in the field of Ancient Indian economic thoughts and administrative principles is marvellous. We are struck with wonder when we find how deeply the learned *ācārya* has studied the society, religion and literature of ancient India to write his monumental book. Politics in all its branches, internal and foreign, civil, military, commercial, fiscal and judicial aspects of the government are discussed with minutest care and even tables of weights, measures of length and divisions of time among others have not been underestimated. So far as its influence on the later literature is concerned, we may hold that such celebrated works as *Yājñavalkyasmṛti*, *Kāmandakanītisāra*, *Nītivākyāmṛta*, *Kāmasūtra*, in one hand and *Pañcatantra*, *Hitopadeśa*, *Raghuvaṃśa*, *Abhijñānaśakuntalā*, *Daśakumāracarita*, *Mudrārākṣasa* and *Harṣacarita* in the other are all indebted to it. Thus it is obvious that even in the domain of Sanskrit literature also the position of it is equally pre-eminent.

But apart from its political value or administrative utility there is another aspect of its importance which has seldom attracted the attention of scholars. This is its traditional and orthodox appeal. The artistic and literary principle based on

accumulated experience or continuous usage is one of its chief characteristics. From the beginning to end it is imbued with the spirit of religious doctrine not heretical or independent-minded. It is absolutely harmonious with what is authoritatively established. Its concepts and postulations, ideas and imaginations, terms and expressions are to be comprehended with ecclesiastical approach.

An attempt has been made here for the first time to understand and analyse *Kauṭilya* as a disciple critically estimates the value of the work of his religious preceptor. The first four chapters, however, deal with the introduction of the identification, antiquity and career of the author, a brief resume of the subject matter of the work, the administrative system of India in *Kauṭilya's* age and the promulgation and exposition of the different branches of learning (*vidyā*). But I have tried in the last three chapters comprising about the three-fourth part to show the real genious of *Kauṭilya*, the Master by interpreting the benedictory and the introductory portions of his work. Its Indian value is manifested in the highly imaginative mental adroitness and innate faculty forming images of external as well as internal objects.

I have been engaged for the last fifteen years in teaching the *Kauṭilīya Arthaśāstra* in different universities of India. I feel an urge to explain this particular aspect. As I endeavoured to discuss the traditional manifestation and ecclesiastical perfection I prefer Sanskrit to English as the medium of language with a view to popularising the *Arthaśāstra* among our orthodox and traditional scholars to whom this text could not claim fair recognition.

No other than myself is more conscious of my limitation of roaming in this untrodden path single-handed. I can only say that I have made an honest attempt of unfolding the real orthodox value of this monumental work. For my short-coming I only crave the indulgence of the scholars.

The authorities of the Sanskrita Sāhitya Pariṣad, Calcutta, Dr. H. N. Chatterjee and Dr. S. R. Banerjee in particular

deserve special thanks for their unfailing courtesy and spirit of accommodation.

For help and encouragement I am indebted to my colleague Dr. N. C. Goswami. I offer my thanks to two of my young and enthusiastic students who have helped me in preparing the manuscript, bibliography and word-index.

I have to express deep obligation to my wife, Srimati Jharna Chatterjee who has always encouraged me in writing this book and is ever alert in getting it through the press.

A few errors or misprints in the following pages could not be avoided in spite of my best efforts.

Any point of suggestion or any new information from scholars regarding the present approach will be welcomed and gratefully appreciated.

It is for the scholarly world to judge how far I have been successful in my attempt.

Department of Sanskrit,
Calcutta University,
Akṣayatṛtīyā
26th April, 1982.

Asoke Chatterjee Śāstrī

accumulated experience or continuous usage is one of its chief characteristics. From the beginning to end it is imbued with the spirit of religious doctrine not heretical or independent-minded. It is absolutely harmonious with what is authoritatively established. Its concepts and postulations, ideas and imaginations, terms and expressions are to be comprehended with ecclesiastical approach.

An attempt has been made here for the first time to understand and analyse *Kauṭilya* as a disciple critically estimates the value of the work of his religious preceptor. The first four chapters, however, deal with the introduction of the identification, antiquity and career of the author, a brief resume of the subject matter of the work, the administrative system of India in *Kauṭilya's* age and the promulgation and exposition of the different branches of learning (*vidyā*). But I have tried in the last three chapters comprising about the three-fourth part to show the real genious of *Kauṭilya*, the Master by interpreting the benedictory and the introductory portions of his work. Its Indian value is manifested in the highly imaginative mental adroitness and innate faculty forming images of external as well as internal objects.

I have been engaged for the last fifteen years in teaching the *Kauṭilīya Arthaśāstra* in different universities of India. I feel an urge to explain this particular aspect. As I endeavoured to discuss the traditional manifestation and ecclesiastical perfection I prefer Sanskrit to English as the medium of language with a view to popularising the *Arthaśāstra* among our orthodox and traditional scholars to whom this text could not claim fair recognition.

No other than myself is more conscious of my limitation of roaming in this untrodden path single-handed. I can only say that I have made an honest attempt of unfolding the real orthodox value of this monumental work. For my shortcoming I only crave the indulgence of the scholars.

The authorities of the Sanskrita Sāhitya Pariṣad, Calcutta, Dr. H. N. Chatterjee and Dr. S. R. Banerjee in particular

deserve special thanks for their unfailing courtesy and spirit of accommodation.

For help and encouragement I am indebted to my colleague Dr. N. C. Goswami. I offer my thanks to two of my young and enthusiastic students who have helped me in preparing the manuscript, bibliography and word-index.

I have to express deep obligation to my wife, Srimati Jharna Chatterjee who has always encouraged me in writing this book and is ever alert in getting it through the press.

A few errors or misprints in the following pages could not be avoided in spite of my best efforts.

Any point of suggestion or any new information from scholars regarding the present approach will be welcomed and gratefully appreciated.

It is for the scholarly world to judge how far I have been successful in my attempt.

Department of Sanskrit,
Calcutta University,
Akṣayatṛtīyā
26th April, 1982.

Asoke Chatterjee Śāstrī

# सूचोपत्रम्

# कौटिलीयार्थशास्त्रचर्चा

## प्राक्कथनम

अतिमहदर्थशास्त्रमिदं प्राचीनतमं भगवता कौटिल्येन विष्णुगुप्तेन वा मिशास्त्रिणा वर्षेभ्यः प्राक् प्रणीतम्। प्राचीनभारतराजशास्त्रस्य अपूर्वतमो ग्र। महामनीषिणोऽनवद्यः प्रसादः। ग्रन्थोऽयं कौटिल्यतत्त्वस्य विषयकृत् कौटिल्य प्रतिभां प्रत्याययति, कौटिल्यस्य पाण्डित्यप्रकर्षं ख्यापयति, भारतस्य Keith प्रमुखा सामाजिकीं च स्थितिं चित्रयति। शास्त्रमिदं ज्ञानमणिभाण्डारस्व नोररीकुर्वन्ति। शास्त्रस्याध्ययनं संक्षिप्ते काले न सम्भवति। दुरूहविषयाप तु तस्मात् पूर्वम्। ग्रन्थः सम्यक्विचारणं तथाध्ययनमध्यापनं चापेक्षते। न्दवंशो मौर्यवंशश्चन्द्र-

मारवुर्ग-विश्वविद्यालये, वाराणसी-विश्वविद्यालये, कलि कांचिदवस्थाप्यत्र न च भारतगौरवभूतमिदं शास्त्रं विंशतिवर्षं यावत् पठद्भिः पा ग्रन्थोपसंहारे च ग्रन्थस्य रुपलब्धं तदेवात्र निवेदितम्। अनतिप्रसरेऽस्मिन् परिसरे मन्यन्ते। ग्रन्थमध्ये च परिचयप्रदानं न सम्भवति। सप्ताध्यायविशिष्टे अत्र ग्रन्थ त्रोपलब्धम्। अपि तु प्राचीनराज्यशासनतन्त्रविद्यासमुद्देशप्रारम्भिकमाङ्गलिकांशार्थ चन्द्रगुप्तः स्वकीयं शास्त्रस्वरुपानि संक्षिप्य विश्लिष्य प्रदर्शितानि। Macdonellमतेनार्थ-

श्वासा विनिर्यान्ति मनः प्रयासि स्वीक्रियते। तन्मते
कार्याणि मूल्यं न समादिशन्ति। तुः परिचये प्रमाणम्।
वाणीविलासाय ममास्ति यत्न व विकारः। अत
स्तत् क्षम्यतां स्नेहवशात् सुधीभिः॥ परमेव प्रणिनायि, न

ग्रन्थस्यास्य प्रकाशने संस्कृतसाहित्यपरिषत्सम्पादकाः तुर्थशतकेऽस्य प्रणयनं अन्ये चाधिकारिपुरुषा यथायथं साहाय्यं कृतवन्त इति तेभ्यन्त्रग्रन्थोऽपिसम्भाव्य- विष्करोमि। संग्रहादिविषये अस्मदीयाः काश्चन शोधविद्भावेऽपि वक्तुं शक्यते ?? प्रायतन्त। मुद्रणालयस्य कर्मचारिण स्तत्त्वावधानं विना स्आसीदिति। खृष्ट- ग्रन्थोऽयं मुद्रापितो न स्यात्।

पत्रिका पत्रसंख्या ११७ ]

सावधानेन मनसास्य ग्रन्थस्य संशोधने कृतेऽपि मनुष्यमात्रसुलभा भवेयुरेव दोषाः ।

"गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ।"

इति न्यायमननुसरन्तो विद्वांसोऽत्रत्यान् दोषानुद्घाट्योऽहं प्रबोधनीयो येन ...स्करणे तेषां निरासाय प्रभवेऽयमिति सविनयं प्रार्थये ।

श्रीअशोकचट्टोपाध्यायशास्त्री
संस्कृतविभागः
कलिकाता विश्वविद्यालयः

## प्रथमोऽध्यायः ।

### ग्रन्थकारविमर्षः

भारतीयतिह्यानुसारतो मौर्यवंशीयस्य प्रथमस्य सम्राजश्चन्द्रगुप्तस्य महामन्त्री चाणक्यः कौटिल्यो वा अर्थशास्त्रग्रन्थं प्रणिनाय। म्लेच्छाक्रमणात् भारतीया वह्वो ग्रन्थागारा विध्वस्ता वभूवुः। अर्थशास्त्रग्रन्थोऽपि तदानीं लुप्त आसीत्। विंशशताब्द्या आद्यदशके महामहोपाध्यायेन श्यामशास्त्रिणा अर्थशास्त्रग्रन्थ आविष्कृतः सन् देशदेशान्तरेषु चाञ्चल्यं जनयामास।

केषांचित् पाश्चात्यानां भारततात्त्विकानां मते अर्थशास्त्रकृत् कौटिल्य श्चाणक्यात् भिद्यत एव। Macdonell, Jolly, Winternitz, Keith प्रमुखा विपश्चितोऽत्र संवदन्ते। केचित्तु कौटिलस्यापि ग्रन्थकर्तृत्वं नोररीकुर्वन्ति। तन्मते खृष्ट्रीयतृतीयचतुर्थशताब्द्योर्मध्येऽस्य प्रणयनं कृतम् न तु तस्मात् पूर्वम्।

Macdonell महोदयानां मते अर्थशास्त्रग्रन्थे नैव नन्दवंशो मौर्यवंशश्चन्द्रगुप्तो वा घुणाक्षरन्यायेनापि उल्लिख्यते। तत्कालीना काचिदवस्थाप्यत्र न प्रतिविम्बिता। आद्ययोरध्याययोः अन्तिमश्लोकयोः ग्रन्थोपसंहारे च ग्रन्थस्य यत् कौटिल्यप्रणीतत्वं समुदीर्यते तत्तु प्रक्षिप्तमेव ते मन्यन्ते। ग्रन्थमध्ये च प्रणेतुश्चाणक्य इति विष्णुगुप्त इति वा नाम कुत्रचिन्नोपलव्धम्। अपि तु कौटिल्यनाम्नैवासावभिहितः। कुटिलतासूचकेन नाम्ना चन्द्रगुप्तः स्वकीयं महामन्त्रिणं विशेषितवानिति नैव सम्भवति। अतः Macdonellमतेनार्थशास्त्रस्य प्रणयनं २०० खृष्टाब्दात् पूर्वं नाभवत्।

Keith महोदयैरपि कौटिल्यचाणक्ययोरभेदो न स्वीक्रियते। तन्मते अर्थशास्त्रलब्धकिमियार इति शब्दः ग्रीकविज्ञानेन सह प्रणेतुः परिचये प्रमाणम्। सुरुङ्गशब्दोऽपि ग्रीकभाषोपलब्धात् Syrinx शब्दस्यैव विकारः। अत स्तन्मतेऽपि अर्थशास्त्रग्रन्थः खृष्टीयशताब्द्या आरम्भात् परमेव प्रणिनायि, न पूर्वम्। अयं च कामसूत्रात् पूर्वभावी स्यात्। खृष्टीये चतुर्थशतकेऽस्य प्रणयनं सम्भवति। वात्स्यायनप्रणीतो न्यायभाष्यग्रन्थस्तथा पञ्चतन्त्रग्रन्थोऽपिसम्भाव्यसमकालीन एव, परमर्थशास्त्रग्रन्थस्तयोः पूर्वभावी। प्रमाणाभावेऽपि वक्तुं शक्यते —ग्रन्थोऽयं केनचिद् राजकर्मचारिणा ३०० खृष्टाब्दे प्रणीत आसीदिति। खृष्ट-

??

पूर्वचतुर्थशताब्दी नैवास्य कालत्वेन परिगणयितुं शक्यते । अयं ग्रन्थो याज्ञवल्क्य-संहितातोऽपि उत्तरभावी ।

Winternitz महोदयानां मतेऽपि ग्रन्थस्यास्य कौटिल्यप्रणीतत्वकथनं व्याज-प्रयुक्तमेव । महाभारते यथा भूमिकायामन्तिमाध्यायेषु च व्याजेन व्यासप्रणीतत्व-मुदीरितं तद्वत् ।

ईदृशी दृष्टिभङ्गी तु भ्रान्ता एव । तत्रायं युक्तिजाल:—

अर्थशास्त्रग्रन्थे एव कौटिल्यविष्णुगुप्तयोरुभयोरपि नाम उपलब्धम् । "इति कौटिल्य:", "नेति कौटिल्य:" इत्येवं रूपेण कौटिल्यस्य नाम बहुश उल्लिखितम् । कौटिल्य: स्वयमपि एवमाह—"कौटिल्येन कृतं शास्त्रमि"ति

सर्वशास्त्राण्यनुक्रम्य प्रयोगमुपलभ्य च
"कौटिल्येन नरेन्द्रार्थे शासनस्य विधि: कृत:"[१] इति च ।

उपसंहारे च पश्याम:—

"येन शास्त्रञ्च शस्त्रञ्च नन्दराजगता च भू: ।
अमर्षेणोद्धृतान्यन्ते तेन शास्त्रमिदं कृतम् ।।"
... .... ...
स्वयमेव विष्णुगुप्तश्चकार सूत्रञ्च भाष्यञ्च ।।"[२] इति

अत: कौटिल्यस्यार्थशास्त्रप्रणेतृत्वविषये नोदेति सन्देहलेश: । किञ्च चाणक्यापरपर्याय एवासावित्यप्यत्र प्रतीयते ।

कामन्दकीयनीतिसारग्रन्थेऽपि कामन्दकेन स्वीक्रियते यत् षट्सहस्रश्लोकात्म-कादर्थशास्त्रग्रन्थात् सारमुद्धृत्य तेनायं ग्रन्थं प्रणिनायीति । कामन्दको हि कौटिल्यं विष्णुगुप्तं गुरुत्वेन वन्दते —'इति नो गुरुदर्शनम्'[३] इति । तस्य स्तुतिं च करोति–

'यस्याभिचारवज्रेण वज्रज्वलनचेतस: ।
पपातामूलत: श्रीमान् सुपर्वा नन्दपर्वत: ।।
एकाकी मन्त्रशक्त्या य: शक्त्या शक्तिधरोपम: ।
आजहार नृचन्द्राय चन्द्रगुप्ताय मेदिनीम् ।।

१ अर्थशास्त्र, ७।१०
२ अर्थशास्त्र, १५।१ ( पाठान्तरम्-अमर्षेणोद्धृतान्याशु' )
३ कामन्दकीयनीतिसार, २।६

नीतिशास्त्रामृतं श्रीमानर्थशास्त्रमहोदधेः ।
य उद्दध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे ।।'१ इति ।

अस्माच्च प्रतीयते—असहायोऽपि तेजस्वी कौटिल्यः सुमन्त्रणया नन्दराजमुत्खाय मोर्यचन्द्रगुप्तं राजानं चकारेति तथा पूर्वाचार्यप्रणीतविपुलार्थशास्त्रसमुद्रं निर्मथ्य अर्थशास्त्रग्रन्थं प्रणिनायेति च ।

अतश्चाणक्यकौटिल्यविष्णुगुप्ता निःसन्देहमभिन्ना एव । इदं चाभिमतं जयमंगलायामपि समर्थितम्—

'विष्णुगुप्तये इति सांस्कारिकी संज्ञा चाणक्यकौटिल्य इति द्वे जन्मभूमिगोत्र-निबन्धने । वेधसे इति । वेधसे पृथक्शास्त्रप्रणयनादेवम् ।'२ तत्रैव पुनः "नमस्तस्मै प्रणेत्रे च कौटिल्याय महर्षये"

"यत् प्रणीताच्छास्त्रादिमं संविक्षेप
तस्याचार्यचाणक्यस्य कुलादिगुणसंस्पर्धनपूर्वकम्"३ इति ।

अतएवार्थशास्त्रं महामन्त्रिणा चाणक्येनैव विष्णुगुप्तकौटिल्याद्यपरनाम्ना प्रणीतम् । चाणक्यस्य च अन्यान्यपि कानिचिन्नामान्यासन् । तथा ह्यभिधान-चिन्तामणौ—

"मल्लो नवनन्दोच्छेदने स च नागश्च मल्लनागः"४
"वात्स्यायनो मल्लनागः कुटिलश्चणकात्मजः ।
द्रामिलः पक्षिलस्वामी विष्णुगुप्तोऽङ्गुलश्च सः ।।"५ इति ।

पुरुषोत्तमदेवप्रणीते त्रिकाण्डशेषकोशेऽपि दृश्यते—

"विष्णुगुप्तश्च कौटिल्यश्चाणक्यो क्रोमिणोऽङ्गुलः (अंशुलः) ।
वात्स्यायनो मल्लनागपक्षिलस्वामिनावपिं ।।६ इति ।

शब्दकल्पद्रुमेऽपि एतच्छ्लोकद्वयमुल्लिखितम् ।

---

१ कामन्दकीयनीतिसार, २।३-५
२ नीतिसारग्रन्थस्य शङ्करार्यप्रणीता जयमङ्गलटीका द्रष्टव्या ।
३ जयमङ्गला, १।२
४ हेमचन्द्र, अभिधानचिन्तामणि, मर्त्तकाण्ड, ५१७
५ हेमचन्द्र, अभिधानचिन्तामणि, मर्त्तकाण्ड, ५१८
६ त्रिकाण्डशेष, ब्रह्मवर्ग, २।२९।५९-६०

चाणक्येन एते ग्रन्था प्रणीताः–

| ग्रन्थाः | नामानि |
| --- | --- |
| अर्थशास्त्रम् | कौटिल्यः विष्णुगुप्तः |
| कामसूत्रम् | वात्स्यायनः मल्लनागः |
| न्यायसूत्रभाष्यम् | वात्स्यायनः पक्षिलस्वामी |
| धातुकौटिल्यः | कौटिल्यः |
| नीतिशास्त्रम् | चाणक्यः |
| ज्योतिषग्रन्थः | वात्स्यायनः विष्णुगुप्तः |
| ब्रह्मसूत्रभाष्यादि | द्रमिलाचार्यः |
| कोशः | वात्स्यायनः |
| आयुर्वेदः | चाणक्यः |
| गौतमस्मृतिभाष्यम् | विष्णुगुप्तः |

अर्थशास्त्रस्य कालविषये विप्रतिपद्यन्ते मनीषिणः। शामशास्त्रिचरणानां मते खृष्टपूर्वचतुर्थशताब्दी अस्य कालत्वेन गणनीया। अयमेव च कालो भारतीयैतिह्यानुसारी। अत्रायं युक्तिजालः—

विष्णुपुराणे एवमुच्यते—

तान्नन्दान् कौटिल्यो ब्राह्मणः समुद्धरिष्यति

... ... ...

कौटिल्य एव चन्द्रगुप्तं राज्येऽभिषेक्ष्यति ॥[१] इति।

अस्य तु विक्षिप्तस्य पौराणिकस्य श्लोकस्य भित्तौ न कोऽपि सिद्धान्तो निश्चयेन कर्त्तुं शक्यते। वर्तमाने यदर्थशास्त्रं लब्धं तत्रोपसंहारे "येन शास्त्रं च..." इत्यादिश्लोको दृश्यते, तथा "स्वयमेव विष्णुगुप्तश्चकार" इत्यादिः स्वीकारोक्तिश्च। किन्तु ग्रन्थेऽस्मिन् कुत्रापि विष्णुगुप्तस्य नाम नास्ति इति समस्या तु चाणक्यस्य बहुनामधेयत्वेन समाधेया।

मृच्छकटिकनाटके[२] शकारवचने चाणक्यस्य नामास्ति "केशविन्दे पलामिट्टा चाणक्केणेव्व दोवदी" इति। मृच्छकटिकस्यादर्शीभूते भासकृते चारुदत्तनाटके तु

१ विष्णुपुराण, ४।६, ७

२ मृच्छकटिक, १।३९

शकारवचने चाणक्यनाम नास्ति। शूद्रकशुङ्गसम्राडग्निमित्रयोरभेदे अङ्गीकृते मृच्छकटिकस्य कालः खृः पूः द्वितीयशताब्दी।

विष्णुशर्म्मकृतपञ्चतन्त्रग्रन्थेऽपि दृश्यते "ततो धर्मशास्त्राणि मन्वादीनि अर्थशास्त्राणि चाणक्यादीनि कामशास्त्राणि वात्स्यायनादीनि"१ इति। अध्यापकाः Johannes Hertel महोदयाः गम्भीरमननेन सिद्धान्तितवन्तो यत् खृः पूः द्वितीयशताब्द्यामस्य ग्रन्थस्य (पञ्चतन्त्रस्य) अस्तित्वं काश्मीरदेशे आसीदिति। तेन मन्वादीनां कालस्तत्पूर्ववर्ती। चाणक्यश्चार्थशास्त्र-प्रणेतृत्वेन खृःपूः द्वितीयशतकेऽपि सुपरिचित आसीत्।

दण्ड्याचार्यप्रणीते दशकुमारचरितग्रन्थेऽपि पश्यामः—

"अधीष्व तावद्दण्डनीतिम्। इयमिदानीमाचार्यविष्णुगुप्तेन मौर्यार्थे षड्भिः श्लोकसहस्रैः संक्षिप्ता"२ इति। अर्थशास्त्रनीतिशास्त्रयोरप्यनुरूपमेवाभिमतं दृश्यते। अत्र "चत्वारिंशच्चाणक्यो" "तेषां हरणोपायाश्चत्वारिंशत्"३ इत्येव-मर्थशास्त्रे राजपुरुषैः प्रकृतीनां सम्पत्तिहरणार्थाश्चत्वारिंशदुपाया वर्णिताः। दशकुमारचरितेऽपि अविकलं तदेवोल्लिख्यते। तत्र चाणक्यविष्णुगुप्तयोरभेदः अर्थशास्त्रस्य च तत्कृतित्वमुदीरितम्। भट्टोत्पलकृतवृहज्जातकटीकायां चापि सममेव मतं दृश्यते।४ भिक्षुप्रभामतीकृतार्थशास्त्रव्याख्या चाणक्यटीकेति व्यपदिष्टा।

विशाखदत्तकृते मुद्राराक्षसे नायकश्चाणक्य एव। तत्र तन्मुखत एव विशाखदत्तः कौटिल्यविष्णुगुप्तोभयनाम एवोच्चारयति६। जयमंगलायामपि अस्य नाटकस्य नाम दृश्यते।

---

१ पञ्चतन्त्रकथामुखम्

२ दशकुमारचरित, २।८

३ अर्थशास्त्र, २।८

४ भट्टोत्पल, बृहज्जातक, ७।७

५ G. Harihara Sastri, Journal of Oriental Research, Madras, xxvi, 1956-57

६ "चाणक्ये अकरुणे सहसा" मुद्राराक्षस, १।२१
"ऽस्माकमुपाध्यायस्य सुगृहीतनाम्न आर्यचाणक्यस्य" मुद्राराक्षस १
"नन्दमिव विष्णुगुप्तः" मुद्राराक्षस १
"जागर्त्ति खलु कौटिल्यः" मुद्राराक्षस ३

पत्रिका पत्रसंख्या १२३ ]

स्कन्दपुराणविष्णुपुराणेष्वपि कौटिल्यस्य नन्दवंशोत्खातृत्वं समुपन्यस्यते। किञ्च, चन्द्रगुप्तस्य राज्याभिषेकोऽपि तेनैव सम्पादित इत्यपि तत्र तत्र दृश्यते। श्रीमद्भागवते नन्दवंशोद्धर्त्तुर्नाम नाभिहितम्—"नव नन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति"[१] इति। अत्र श्रीधरभाष्येषु तु व्याख्यातम्—"द्विजः कौटिल्य-वात्स्यायनादि-पर्यायश्चाणक्य" इति।

एवमत्र दृश्यते—विष्णुगुप्तकौटिल्याद्यपरनामा चाणक्य एवार्थशास्त्र-प्रणेता। आनुमानिके ३२१ खृष्टपूर्वाब्दे नन्दराज्यमुत्खायासौ मौर्यचन्द्रगुप्तं भारतसाम्राज्ये प्रतिष्ठितवान्। अतोऽर्थशास्त्ररचनाकालः ३१० खृष्टपूर्वाब्द इति सिद्धान्तो नासमीचीनः।

पाश्चात्यगवेषकास्तु अन्यविधं मतं पोषयन्तोऽर्थशास्त्रस्यार्वाचीनत्वं प्रतिष्ठापयितुं यतन्ते। तेषामयमभिप्रायः—

(१) अर्थशास्त्रे चन्द्रगुप्तस्य नाम नास्ति। तस्य च विशालस्य साम्राज्यस्य राजधानीभूतस्य पाटलिपुत्रस्य वा कोऽप्युपन्यासोऽत्र न दृश्यते।

(२) Megasthenes महोदयेन, तदीयवृत्तान्ते कौटिल्यनाम नोल्लिख्यते।

(३) अर्थशास्त्रलब्धः सुरुङ्गशब्दः ग्रीकभाषोपलब्धेन syrinx शब्देन सगर्भ्य इति Keith महोदयानां मतम्।[२] स च शब्दः खृष्टोत्तरकाले संस्कृते गृहीत आसीत् इत्यपि स मन्यते। Winternitz महोदयोऽप्यनुरूपमभिमतं पोषयति[३]। सुरुङ्गशब्दश्चार्थशास्त्रे बहुशः प्रयुज्यते।

"सुरुङ्गां बहुमुखीं कृत्वा"[४]

"सुरुङ्गायां"[५]

"सुरुङ्गापथे प्रतिसुरुङ्गं कारयेत्"[६]

---

१ श्रीमद्भागवत, १२।१।११

२ A. B. Keith, History of Sanskrit Literature, p. 400

३ Indian Historical Quarterly, Vol. I

४ अर्थशास्त्र, गणपतिशास्त्री, तृतीय खण्ड, पृ. १७४

५ ,, ,, ,, पृ. १७४

६ ,, ,, ,, पृ. १७५

"सुरुङ्गमुखेन"[१] इति च ।

(४) अर्थशास्त्रे खलु प्रणेतुरगाधं पाण्डित्यमभिव्यज्यते । अतो हि केनचिदेकलेन पुरुषेण नैतत् प्रणेतुं शक्यमासीत् । अत्र वहवः प्रणेतारोऽनुसन्धेयाः ।

एतास्तु युक्तयो नाखण्डनीयाः । एतासां खण्डनमेवंरूपेण कर्तुं शक्यम् ।

(१) ग्रन्थोपसंहारे 'येन शस्त्रं च शास्त्रं च' इत्यादयः श्लोकाः समकालीनमितिवृत्तं विष्णुगुप्तेन नन्दवंशध्वंसं समुल्लिखन्त्येव । किञ्च, "कौटिल्येन नरेन्द्रार्थे शासनस्य विधिः कृतः" इत्यस्मिन् श्लोके यस्य राज्ञ उल्लेखोऽस्ति नासौ मौर्यचन्द्रगुप्तव्यतिरिक्तोऽपरः कोऽपि । दण्डयाचार्यस्य "आचार्यविष्णुगुप्तेन" इप्यादिना वचनेन तस्य स्पष्टीकरणं पूर्णसमर्थनं च क्रियते । किञ्च अर्थशास्त्रे मौर्यसाम्राज्यस्य विस्तारविषये एवमुक्तम्—"देशः पृथिवी । तस्यां हिमवत् समुद्रान्तरमुदीचिनां योजनसहस्रपरिमाणं तिर्यक् चक्रवर्तिक्षेत्रम्"[२] इति । भारतवर्षाणामेवेयं भौगोलिकी वर्णना । न हि मौर्यचन्द्रगुप्तादव्यवहितपूर्वकाले कोऽप्युत्तरापथस्य एकच्छत्रश्चक्रवर्ती सम्राड् भवितुम् समीहाञ्चक्रे । अत्र ग्रन्थे च राज्यशासनप्रणाली सुष्ठु सूक्ष्मं च वर्णिता सती सुसमृद्धस्यैव साम्राज्यस्य चित्रमावहति । न ह्ययं ग्रन्थो राजविशेषपरितोषणार्थं लिपिवद्ध आसीत् । अतएव अत्र पाटलिपुत्रस्य चन्द्रगुप्तस्य वा नाम्नोऽनुल्लेखः स्वाभाविक एव । न हि तदनुल्लेखनिमित्तमर्थशास्त्रस्य चाणक्यप्रणीतत्वं व्याहन्तुमीशम् ।

(२) Megasthenes महोदयेन Indika नामधेयं यत् भारतविषयकं पुस्तकं प्रणीतं तद्धि सम्पूर्णतया नोपलब्धम् । तस्य खण्डितांशमात्रमेव Arrian, Pliny प्रमुखानां परवर्तिनां ग्रन्थेषु उपन्यस्तं दृश्यते । अपि च, यदि तत्र Indika ग्रन्थे कौटिल्यस्य उल्लेख एव न स्यात्, तर्हि का क्षतिः ? न हि तेन कौटिल्यस्य तत्कालाभावित्वं चाणक्यभेदो वा प्रमाणीभवति ।

(३) सुरुङ्गशब्दश्च शुद्धः संस्कृतः शब्दः । न तु ग्रीकभाषाया गृहीतः । Syrinx शब्दात् प्रागेव संस्कृते सुरुङ्गशब्दस्योद्भव आसीत् । सूपसृष्टाद्

१ ,, ,, ,, पृ. १८०
२ अर्थशास्त्र, ९'१

रञ्जूधातोः कर्तरि घञि सुरङ्गशब्दो निष्पाद्यते । कदापि च सुरुङ्ग इत्यपि अस्य रूपं भवति । यवनभाषाया गृहीते सति अस्मिन् शब्दे न हि अस्य प्रातिपदिकरूपेण व्याकरणघटिता व्युत्पत्तिः स्यात् । संस्कृतकोशग्रन्थेऽपि अस्य उल्लेखो दृश्यते । अस्य पर्यायत्वेन च "हिङ्गुल-पत्तङ्ग-नागरङ्ग शोभाञ्जन-विलविशेष-गर्त्त-भूविवर-सन्धि-कँवर्त्तिका"दिकमुल्लिख्यन्ते । वैदेशिकभाषाया गृहीतस्य शब्दस्य न हि एतादृशा बहुविधा अर्था भवितुमर्हन्ति । महाभारतेऽपि सुरङ्गशब्दः प्रयुक्तः "सुरङ्गोपक्रमक्रिया"२ "सुरङ्गां विविशुर्तूर्णम्"३ इति । महाभारतग्रन्थस्य पाणिनिव्याकरणपूर्ववर्तित्वं स्वीकरणीयमेव । न हि तदा ग्रीकजातीया भारतवर्षेष्वागताः । किञ्च, प्राचीने भारते म्लेच्छभाषाशिक्षा निषिद्धा गर्ह्या चासीत् । यवनभाषाया अस्य सुरङ्गशब्दस्योत्पत्तौ सत्यां सर्वजनपूजिते महाभारते न तस्य स्थानं स्यात् । अपि च, Syrinx इति शब्दो ग्रीकभाषायां न कुत्रापि भूविवरं बोधयितुं प्रयुक्तः । प्रत्युत Syrinx इति शब्दो नैव ग्रीकभाषीय एव । Surigx इति Surinx इति वा शब्दस्तत्र वेणुं वंशं वा बोधयति । Syrinx इति शब्द आङ्गलभाषायामस्मादेवोद्भूतः । तदर्थश्च (१) ग्रीकदेवतायाः Pan नामधेयाया वेणुः (२) मिशरदेशीय ममीत्याख्यसुरक्षितशवदेहरक्षणार्थसमाधिस्थितप्रस्तरेषु निर्मितः संकीर्णः पन्था इति । द्वितीयश्चायमर्थो गौण एव । अतः Syrinx शब्दो मूलतया न ग्रीकभाषान्तर्गतः, अपि तु Surigx, Surinx इत्यस्माद्वाविर्भूत आङ्गलशब्द इति तद्भवोऽर्थः । प्रत्युत तस्यार्थो वंशीविशेषः । भूविवरार्थेऽस्य प्रयोगः परवर्तिशतवर्षमध्ये प्रचलितः ।

(४) प्राचीनभारतीया शिक्षापद्धतिः सर्वाङ्गसुन्दरतयाः विशिष्टासीत् । विद्यामहार्णवाणां पण्डितप्रकाण्डानामाविर्भावोऽत्र नाश्चर्यकरः । पुरा राजकुमारादयोऽपि चतुःषष्टिकलापारदर्शिनोऽभवन् ।

वस्तुतस्तु चाणक्य-विष्णुगुप्तोऽयं खल्वनन्यसाधारण प्रतिभाधरः पुरुष आसीत् । विपुलस्य साम्राज्यस्य कर्णधारोऽयं विपुलं कार्यभारं वहन्नप्यर्थशास्त्रं तथान्यानि बहून्यपि पुस्तकानि प्रणिनाय ।

१ शब्दकल्पद्रुम
२ महाभारत, आदिपर्व, २।१०८
३ महाभारत, आदिपर्व, १४८।१२

एवं च न केवलं राजनीतिक्षेत्रे, अपि तु साहित्यगगनेऽपि पाण्डित्येन विशिष्टां पदवीमधिरूढोऽयं चाणक्यः पण्डितः। सूत्राकारेण दुरूहभाषया रचितस्यास्य ग्रन्थस्य तात्पर्यानुधावनाय प्रगाढ़ज्ञानानामपि पण्डितानामुद्यमभङ्गः क्रियते। तेनैव कृतभाष्योऽयं ग्रन्थस्तथापि त्वेतादृशः क्लेशः।

अत्र ग्रन्थे न केवलं राजनीतिमेवाधिकृत्यालोचना प्रवर्तिता। अत्र महति ग्रन्थे षड्भिः श्लोकसहस्त्रैः राजनीति-समाजनीति-गार्हस्थ्य-युद्धनीति-पशुपालन-खनिजद्रव्यविद्या-शिल्पव्यवस्थायुर्वेदादयोऽगणिता विषया आलोचिताः। अस्य ग्रन्थस्य पञ्चदश अधिकरणानि, अशीतिः प्रकरणानि पञ्चाशदध्यायशतं षट्-श्लोकसहस्त्राणि।

ऐतिहासिकतयाप्यस्य ग्रन्थस्यानन्यं गुरुत्वमस्ति। अस्यैतिहासिकी भूमिः सुदृढ़ैव। येषां ग्रन्थानां नामानि पुरुषाणां वात्र समुपलब्धानि तानि नैव स्वकपोलकल्पितान्यपि तु निश्चितमैतिहासिकानि।

## द्वितीयोऽध्यायः

### ग्रन्थविषयः

सामान्यतः कौटिलीयमर्थशास्त्रं राजनीतिविषयकं राज्यशासनप्रणाली-विषयकं वेत्युच्यते। दण्डनीतिविषयकग्रन्थत्वेनाप्यस्य परिचितिर्दृश्यते।

भारतीयप्राचीनार्थशास्त्रप्रणेतारो नीतिशास्त्रकाराश्च राज्यं सप्ताङ्ग-मित्याहुः। कौटिल्योऽपि प्रकृतिसम्पन्नामके प्रकरणे राज्यस्य सप्तानां प्रकृतीनां नामान्याहुः—स्वाम्यमात्यजनपददुर्गकोषदण्डमित्रभेदेन। प्रभुशक्त्या मन्त्रशक्त्या उत्साहशक्त्या चोपेतो राजा स्वामी वा राजतन्त्रस्य केन्द्रभूतः प्रथमः प्रकृतिरूप आसीत्। अमात्याभिधेयया द्वितीयया प्रकृत्या राज्ञो धीसचिवः कर्म्मसचिवस्तथा-राजतन्त्रशासनप्रणाल्यां सर्वविधशासनाधिकारस्था ये अध्यक्षा स्तेषामधस्तनाश्च कर्मचारिणोऽपि परामृष्टाः। जनपदेन राष्ट्रेण वा नग-रातिरिक्तौ अवशिष्टो देशो देशवासिनश्च बोद्धव्याः। जलदुर्ग-स्थलदुर्ग-वनदुर्ग-पर्वतदुर्ग-मरुदुर्ग-प्रान्तदुर्गादिकं तथा प्राचीरपरिखादिवेष्टितं सुरक्षितं नगरमपि

दुर्गशब्दः व्यपदिशति। राजभाण्डारस्थ-रत्नादिकं सारवस्तु तथा वस्त्रादिफल्गु अर्थात् यावद्विधानि द्रव्याणि तत्र राजभाण्डारे विद्यन्ते तावन्त्येव कोषशब्दो व्याचष्टे। दण्डो बलं वा हस्त्यश्वरथपदातिकात्मकचतुरङ्गसेना। तत्र मौलबलभृतकबलादिभेदेन पदातिकानां वैविध्यम्। मित्रशब्देन सुहृच्छब्देन वा द्वादशराजमण्डलेषु विजिगीषुणा राज्ञा मित्रतावस्थाः नृपा बोद्धव्याः। इमाः सप्तप्रकृतयो यदि सम्मिलिताः सत्यः कार्यं कुर्वन्ति तर्हि राज्यशरीरं समृद्धं जायते। परस्परनिरपेक्षत्वे आसां राष्ट्रव्याधिरुत्पद्यते। अतएव इदं सप्तप्रकृतिकं सप्ताङ्गं राज्यं वा प्राचीनभारतीयराजनीतिशास्त्रस्यालोच्यम्।

कौटिलीयार्थशास्त्रे वर्णितं राजतन्त्रं न ह्यनियन्त्रितस्य राज्ञे आधिपत्य-विषयकम्। अपि तु तत्रोपलब्धं राज्यं सचिवायत्तमेवेति कथयितुं शक्यम्। तन्त्रावापौ हि राज्ञः कर्त्तव्यत्वेन विहितौ भवतः। एवं हि स्वविषयमध्ये प्रजानां योगक्षेमौ सम्परीत्य शासनव्यवस्थां यत् करोति तदेव तन्त्रशब्देनाभि-धीयते। आसन्नानां विप्रकृष्टानां च राज्ञां कार्य्यकलापस्य सम्यक्तया पर्यवेक्षणं प्रयोजनोपादितौ च युद्धवृत्तिरपि राज्ञः कर्त्तव्यमेव। एवं षाड्गुण्येषु देशकालविवेचनया यथार्थस्य गुणस्य प्रयोगेण शत्रुनृपं प्रति कूटनीतिप्रयोग एवावापशब्दवाच्यः। कौटिलीयार्थशास्त्रस्याधिकरणप्रकरणाध्यायानां क्रम-सन्निवेशे परिकल्पनायां च एतस्यास्तन्त्रावापात्मिकाया नीतेः प्रभावः स्यादपि। तथा हि शास्त्रस्य तन्त्रांशे पञ्चस्वधिकरणेषु पञ्चनवतिसंख्याकानां प्रकरणानां षण्णवतिसंख्याकानां चाध्यायानां तथावापांशे चोत्तरवर्त्तिषु नवस्वधिकरणेषु चतुरधिकाशीतिसंख्याकानां प्रकरणानां तथा त्रिपञ्चाशता-मध्यायानां सन्निवेशो दृश्यते। प्रकरणमात्रात्मके तु पञ्चदशाधिकरणे एक-स्मिन्नध्याये आलोच्यन्ते ये विषयास्तेषां तन्त्रावापयोरन्तर्भावनं नावश्यकमिति भवति। तत्र

(१) विनयाधिकारिकम् ( राज्ञो विनयविद्यादिशिक्षाप्रस्तावयुक्तम् )

(२) अध्यक्षप्रचारः (विभिन्नशासनविभागेषु नियुक्तानामध्यक्षाणां कर्त्तव्या-दिनिर्णयोपेतः )

(३) धर्मस्थीयम् ( धर्माधिकरणविषयकव्यवहारस्थापनयुक्तम् )

(४) कण्टकशोधनम् ( दण्डाधिकरणसम्पर्कीयव्यवहारे समाजस्य उपद्रवकारिणां शास्तिविधानयुक्तम् )

(५) योगवृत्तम् ( गूढ़पुरुषादिकर्तृकोपांशुवधादिप्रयोगयुक्तम् ) इति आद्यानि पञ्चाधिकरणानि ।

अथ

(६) मण्डलयोनिः ( द्वादशराजमण्डलानां चिन्ताविषयकम् )

(७) षाड्गुण्यम् ( सन्ध्यादीनां षण्णां गुणानां प्रतिपादनयुक्तम् )

(८) व्यसनाधिकारिकम् ( सप्ताङ्गराज्यस्यापत्पाताद्यालोचनयुक्तम् )

(९) अभियास्यत्कर्म ( विजिगीषोः राज्ञः शत्रुं प्रत्यभियानसम्बन्धीयम् )

(१०) सांग्रामिकम् ( संग्रामविषयकालोचनयुक्तम् )

(११) संघवृत्तम् ( संघादिकं प्रति विजिगीषोराचरणसम्बन्धीयम् )

(१२) आबलीयसम् ( दुर्बलतरस्य विजिगीषोः करणीयोपेतम् )

(१३) दुर्गलम्भोपायः ( शत्रुदुर्गस्य लाभोपायसम्बन्धीयम् )

(१४) औपनिषदम् ( परोक्षतया शत्रुजयोपायरहस्यविषयकम् ) इति नवाधिकरणानि ।

(१५) अन्तिमं तु अधिकरणं तन्त्रयुक्तिः ( अर्थशास्त्रे प्रचलितानां द्वात्रिंशद्विधानां व्याख्यानन्यायानामालोचनम् ) ।

ग्रन्थेऽस्मिन् पञ्चदशाधिकरणेषु बहूनि प्रकरणानि विद्यन्ते । अत्र तेषां काचन संक्षिप्ता सूची प्रस्तूयते—

प्रथमे अधिकरणे अष्टादशप्रकरणानि—विद्यासमुद्देशः, वृद्धसंयोगः, इन्द्रियजयः, अमात्योत्पत्तिः, मन्त्रिपुरोहितोत्पत्तिः, उपधाभिः शौचाशौचज्ञानममात्यानाम्, गूढ़पुरुषोत्पत्तौ संस्थोत्पत्तिः, गूढ़पुरुषोत्पत्तौ सञ्चारोत्पत्तिः, स्वविषये कृत्याकृत्यपक्षरक्षणम्, परविषये कृत्याकृत्यपक्षोपग्रहः, मन्त्राधिकारः, दूतप्रणिधिः, राजपुत्ररक्षणम्, अवरुद्धवृत्तम्, अवरुद्धे च वृत्तिः, राजप्रणिधिः, निशान्तप्रणिधिः, आत्मरक्षितकम् ।

द्वितीये अधिकरणे अष्टत्रिंशत् प्रकरणानाम्—जनपदनिवेशः, भूमिच्छिद्रविधानम्, दुर्गविधानम्, दुर्गनिवेशः, सन्निधातृनिचयकर्म, समाहर्तृसमुदयप्रस्थापनम्, अक्षपटले गाणनिक्याधिकारः, समुदयस्य युक्तापहृतस्य प्रत्यानयनम्, उपयुक्तपरीक्षा,

शासनाधिकारः, कोशप्रवेशरत्नपरीक्षा, आकरकर्मान्तप्रवर्तनम्, अक्षशालायां सुवर्णाध्यक्षः, विशिखायां सौवर्णिकप्रचारः, कोष्ठागाराध्यक्षः, पणाध्यक्षः, कुप्याध्यक्षः, आयुधागाराध्यक्षः, तुलामानपौतवम्, देशकालमानम्, शुल्काध्यक्षः, सूत्राध्यक्षः, सीताध्यक्षः, सुराध्यक्षः, सूनाध्यक्षः, गणिकाध्यक्षः, नावध्यक्षः, गोऽध्यक्षः, अश्वाध्यक्षः, हस्त्यध्यक्षः, रथाध्यक्षः, पत्त्यध्यक्षः, सेनापतिप्रचारः, मुद्राध्यक्षः, विवीताध्यक्षः, समाहर्तृप्रचारः, गृहपतिवैदेहकतापसव्यञ्जनाः प्रणिधयः, नागरिकप्रणिधिः।

तृतीये धर्मस्थीये अधिकरणे ऊनविंशति प्रकरणानि—व्यवहारस्थापना, विवादपदनिबन्धः, विवाहसंयुक्तम्, दायविभागः, वास्तुकम्, समयस्यानपाकर्म, ऋणादानम्, औपनिधिकम्, दासकर्मकरकल्पः, सम्भूयसमुत्थानम्, विक्रीतक्रीतानुशयः, दत्तस्यानपाकर्म, अस्वामिविक्रयः, स्वस्वामिसम्बन्धः, साहसम्, वाक्पारुष्यम्, दण्डपारुष्यम्, द्यूतसमाह्वयम्, प्रकीर्णकानि।

चतुर्थं नाम कण्टकशोधनम् अधिकरणम्। अत्र त्रयोदश प्रकरणानि—कारुकरक्षणम्, वैदेहकरक्षणम्, उपनिपातप्रतीकारः, गूढाजीविनां रक्षा, सिद्धव्यञ्जनैर्माणवप्रकाशनम्, शङ्कारूपकर्माभिग्रहः, आशुमृतकपरीक्षा, वाक्कर्मानुयोगः, सर्वाधिकरणरक्षणम्, एकाङ्गवधनिष्क्रयः, शुद्धश्चित्रश्च दण्डकल्पः, कन्याप्रकर्म, अतिचारदण्डः।

पञ्चमे अधिकरणे सप्तप्रकरणानि—दाण्डकर्मिकम्, कोशाभिसंहरणम्, भृत्यभरणीयम्, अनुजीविवृत्तम्, समयाचारिकम्, राज्यप्रतिसन्धानम्, एकैश्वर्यम्।

षष्ठमधिकरणम् मण्डलयोनिः। अत्र प्रकरणद्वयम्—प्रकृतिसम्पदः, शमव्यायामिकम्।

सप्तमे अधिकरणे एकोनत्रिंशत् प्रकरणानि—षाड्गुण्यसमुद्देशः, क्षयस्थानवृद्धिनिश्चयः, संश्रयवृत्तिः, समहीनज्यायसां गुणाभिनिवेशः, हीनसन्धयः, विगृह्यासनम्, सन्धायासनम्, विगृह्य यानम्, सन्धाय यानम्, सम्भूय प्रयाणम्, यातव्यामित्रयोरभिग्रहचिन्ता, प्रकृतीनां क्षयलोभविरागहेतवः, सामवायिकविपरिमर्शः, संहितप्रयाणिकम्, परिपणितापरिपणितापसृताश्च सन्धयः, द्वैधीभाविकाः सन्धिविक्रमाः, यातव्यवृत्तिः, अनुग्राह्यमित्रविशेषाः, मित्रहिरण्यभूमिकर्मसन्धयः, पार्ष्णिग्राहचिन्ता, हीनशक्तिपूरणम्, बलवता विगृह्योपरोधहेतवः,

दण्डोपनतवृत्तम्, दण्डोपनायिवृत्तम्, सन्धिकर्म, सन्धिमोक्षः, मध्यमचरितम्, उदासीनचरितम्, मण्डलचरितम् ।

अष्टमम् अधिकरणं नाम व्यसनाधिकारिकम् । अस्मिन्नधिकरणे अष्ट-संख्यकानि प्रकरणानि—प्रकृतिव्यसनवर्गः, राजराज्ययोर्व्यसनचिन्ता, पुरुषव्यसन-वर्गः, पीड़नवर्गः, स्तम्भवर्गः, कोशसंगवर्गः, वलव्यसनवर्गः, मित्रव्यसनवर्गः ।

नवमे अधिकरणे द्वादशप्रकरणानि—शक्तिदेशकालवलावलज्ञानम्, यात्रा-कालाः, वलोपादानकालाः, सन्नाहगुणाः, प्रतिवलकर्म, पश्चात्कोपचिन्ता, वाह्याभ्यन्तरप्रकृतिकोपप्रतीकारः, क्षयव्ययलाभविपरिमर्शः, वाह्याभ्यन्तराश्चा-पदः, दूष्यशत्रुसंयुक्ताः, अर्थानर्थसंशययुक्ताः, तासामुपायविकल्पजाः सिद्धयः ।

दशमम् अधिकरणं सांग्रामिकनामधेयम् । अत्र त्रयोदशप्रकरणानि—स्कन्धावारनिवेशः, स्कन्धावारप्रयाणम्, वलव्यसनावस्कन्दकालरक्षणम्, कूटयुद्ध-विकल्पाः, स्वसैन्योत्साहनम्, स्ववलान्यवलव्यायोगः, युद्धभूमयः, प्रत्यश्वरथ-हस्तिकर्माणि, पक्षकक्षोरस्यानां वलाग्रतो व्यूहविभागः, सारफल्गुवलविभागः, पत्त्यश्वरथहस्तियुद्धानि, दण्डभोगमण्डलासंहतव्यूहव्यूहनम्, तस्य प्रतिव्यूह-संस्थापनम् ।

एकादशाधिकरणे प्रकरणद्वयं—भेदोपादानानि, उपांशुदण्डश्च ।

द्वादशाधिकरणे नवप्रकरणानि—दूतकर्म, मन्त्रयुद्धम्, सेनामुख्यवधः, मण्डलप्रोत्साहनम्, शस्त्राग्निरसप्रणिधयः, विवधासारप्रसारवधः, योगाति-सन्धानम्, दण्डातिसन्धानम्, एकविजयः ।

त्रयोदशमधिकरणं नाम दुर्गलम्भोपायः । अत्र षड् प्रकरणानि—उपजापः, योगवामनम्, अपसर्पप्रणिधिः, पर्युपासनकर्म, अवमर्दः, लब्धप्रशमनम् ।

चतुर्दशाधिकरणे त्रीणि प्रकरणानि—परघातप्रयोगः, प्रलम्भनम्, स्ववलोप-घातप्रतीकारः ।

अन्तिमे पञ्चदशाधिकरणे एकमेव प्रकरणं—तन्त्रयुक्तिरिति ।

(8) व्युरोक्रेसी

# तृतीयोऽध्यायः

## प्राचीनराज्यशासनतन्त्रम्

प्राचीनभारतवर्षाणां राज्यशासनतन्त्रस्य किञ्चित् स्पष्टं चित्रं कौटिलीय-ग्रन्थे समुपलभ्यते। अधुना यद् "आमलातन्त्र" इति कथ्यते तेनास्य सादृश्यं सुवचमेव। शासनविभागेषु विविधप्रकारा अध्यक्षा अधिष्ठिता आसन्।[1] महामात्या महामात्रा वा, उपयुक्तः, युक्तः, लेखकः, गाणनिकः, समाहर्ता, सन्निधाता, सेनापतिः, प्रदेष्टा, नायकः, व्यवहारिकः, कार्मान्तिकः, प्रशस्ता, दौवारिकः, आन्तर्वंशिक इत्येवमादीनां विचित्रप्रकारकर्मव्यापृतानां पुरुषाणां समुपन्यासः क्रियतेऽत्र। आर्थनीतिकत्वेन प्राचीनकालेऽपि ग्रामदेश एव क्षुद्रतमः केन्द्र आसीत् तथा राजनीतिकतयापि स एव स्वायत्तशासनविषये स्वाधीनं प्रतिष्ठानमिति परिगणितम्। जनपदसन्निवेशकाले राजा तत्र शूद्रजातीयान् कर्षकजातीयान् च पुरुषानेव संख्यागरिष्ठतयाधिवासयेयुः। दशग्रामाणां संग्रहेण या ग्रामसंहतिः रचिता सा तु संहणपदाभिधेया। द्विशतग्रामात्मिका संहतिः कार्वटिकः खार्वटिक इति वा कथिता। चतुःशतग्रामात्मिका संहतिः द्रोणमुखपदेन, अष्टशतग्रामात्मिका च स्थानीयपदेन व्यपदिष्टा। दुर्ग-नाम्नाभिहितानां विशालानां पुराणां नगराणां वा तदा प्राकारादिना परिवेष्टनं लक्ष्यते। नूतनग्रामसन्निवेशकाले राजा ऋत्विगाचार्यपुरोहितश्रोत्रियेभ्यो दण्डकरमुक्तां ब्रह्मदेयभूमिं प्रायच्छत्। शस्योत्पादनोपयोगि कृतक्षेत्रं कर-दायिभ्यः कर्षकेभ्य एकपुरुषमात्रभोग्यं कृत्वा राजा प्राददत्। तथा खिल-क्षेत्रमपि ये कृतक्षेत्रे पर्यवसाययितुं समर्था आसन् तेभ्यो न तत् क्षेत्रं प्रत्यगृह्णात्। तादृगक्षेत्राणां स्वामित्वमपि तेष्वेव पर्यवसितमासीत्। राजकोषस्य समृद्धिं विविच्य राजा कर्षकस्य कृते बीजादिदानरूपमनुग्रहं तथा करमुक्तिरूपं परिहारं च व्यवस्थापयति स्म। कोपोपघातं तु सा रीतिर्वर्जनीया। "अल्पकोषो हि राजा पौरजानपदानेव ग्रसते।"[2]

---

१। द्रष्टव्यम् अर्थशास्त्र, २।१

२। अर्थशास्त्र, २।१

जनपदसन्निवेशं वर्णयता कौटिल्येन जनपदेषु प्रतिष्ठितानां पुरुषाणां कृते केचिन्नियमा अपि निर्धारिताः। तथा हि यः स्त्रीपुत्रादीनां भरणव्यवस्थामकृत्वैव प्रव्रजेत् स्त्रियं च प्रव्राजयेत् स दण्डार्ह इति। पुत्रोत्पादनासमर्थ एव "प्रव्रजेदापृच्छ्य धर्मस्थान्"१। अन्यथा तु कारायां स निक्षेप्तव्यः। किञ्च, राज्ञो नूतनजनपदनिवेशं "वानप्रस्थादन्यः प्रव्रजितभावः, सुजातादन्यः संघः, सामुत्थायकादन्यः समयानुबन्धो वा"२ नोपवसेत्। राज्यस्यायव्ययौ समाहर्त्तर्युपन्यस्तावास्ताम्।

अमात्यसम्पद्युक्तानुपयुक्ताभिधेयानधिकारिणस्तत्कर्मशक्तिपरीक्षापूर्वकं सर्वकार्येषु नियोजयेत्, "बहुमुख्यमनित्यं चाधिकरणं स्थापयेत्"। राजकर्मचारिणो हि राजार्थं यथात्मसात् न कुर्युस्तथाधिकरणानि सर्वाण्यपि बहुमुख्यकर्मचारियुक्तानि स्युः। कोऽपि च कर्मचारी एकस्मिन्नेव कृत्ये न बहुकालं नियोज्येत। अर्थविभागे व्यापृता राजपुरुषाः स्वल्पमपि राजार्थं नास्वादयन्तीति नैव भवति।

"यथा ह्यनास्वादयितुं न शक्यं जिह्वातलस्थं मधु वा विषं वा।
अर्थस्तथा ह्यर्थचरेण राज्ञः स्वल्पोऽप्यनास्वादयितुं न शक्यः।"३

दुर्गनिवेशकालेऽपि दुर्गस्थानात् जनानां नित्यप्रयोजनीयानि स्नेहक्षारलवणभैषज्ययवसतृणकाष्ठलोहचर्मवेणुप्रहरणकवचादीनि द्रव्याणि बहुवर्षोपयोगीनि रक्षितव्यानि। पुरातनानां द्रव्याणां व्यवहारेण नूतनानां सञ्चयमक्षुण्णं यथा स्यात् तथा कर्त्तव्यम्।

तदानीन्तने काले लवणस्य राजपण्यपर्यायेऽन्तर्भावो दृश्यते। आगन्तुलवणस्य षड्भागश्च४ तदा राजकोशे शुल्कत्वेन देय आसीत्। अर्थनीतिविषये चात्र कौटिल्यस्य सूक्ष्मेक्षिका श्लोकेनोपन्यस्तात्र समुपस्थाप्यते—

राष्ट्रपीड़ाकरं भाण्डमुच्छिन्द्यादफलं च यत्।
महोपकारमुच्छुल्कं कुर्याद् बीजं च दुर्लभम्॥ इति।

---

१ अर्थशास्त्र, २।१ (पाठान्तरम्—प्रव्रजेदावृश्च्य धर्मस्थान्)
२ अर्थशास्त्र, २।१
३ अर्थशास्त्र, २।९
४ 'आगन्तुलवणं षड्भागं दद्यात्' अर्थशास्त्र, २।१२

तत्काले नागरिकाभिधेयस्य महामात्रस्य पर्यवेक्षणेन नगरेषु पौरशासनविधिः प्रचलित आसीदित्यवगम्यते। तदध्ययनेन तु इदानीन्तनेन पौरप्रतिष्ठानीय-प्रधानाधिकारिणः शासनविधिना तस्य सादृश्यं स्फुटीभवति। नागरिकाधीनत्वेन स्थानिका गोपाश्चेति द्विविधाः कर्मचारिणो नगरस्थानां स्त्रीपुरुषाणां जातिगोत्र-नामव्यवसायसंख्यायव्ययादिकं लिपिवद्धं चक्रुः।

कौटिल्यस्य समकालीने काले दासप्रथा प्रचलितासीत्। परं सा प्रथा किञ्चित् सामाजिकनियमबद्धासीत् इति प्रतिभाति। तत्र चोक्तम् "म्लेच्छा-नामदोषः प्रजां विक्रेतुमाधातुं वा। न त्वेवार्यस्य दासभावः।"१ आर्येण स्वविक्रये सत्यपि तस्य पुत्रपौत्रादय आर्यत्वेनैव गणयितव्याः। निष्क्रयमूल्यप्रदानेन त्वार्य आत्मविक्रयी पुनरप्यार्यत्वं लभते। कौटिलीयादर्थशास्त्रात्तदानीं विधवाविवाहस्य प्रचलनं ज्ञायते। विवाहवन्धनच्छेदोऽपि (divorce) तत्काले प्रचलित इति तत्त एव उपलब्धम्। "अमोक्ष्या भर्त्तुरकामस्य द्विषती भार्य्या भार्य्यायाश्च भर्त्ता। परस्परं द्वेषान् मोक्षः"२ इति विवाहवन्धनमोक्षे हेतुर्दर्शितः।

एवंरूपेण वहवो विषयाः राजनीतिकाः सामाजिकाश्च कौटिल्यमहापादैः स्वग्रन्थे उपनिवद्धाः।

वस्तुतस्तु कौटिलीया राजनीतिर्हि ब्राह्मणादीनां चतुर्णां वर्णानां तथा ब्रह्म-चर्यादीनां चतुर्णामाश्रमाणां च स्वस्वधर्मपालनरूपायां भित्तौ प्रतिष्ठिता। लोकयात्रायाः सुनिर्वाहार्थं राजा यथार्थदण्डधरः सन् राज्यशासने प्रवर्तेत। लोकसमाजे मात्स्यन्यायं निवारयितुं राजा यथार्हदण्डः स्यात्। वर्णाश्रमधर्मे पालिते तु यत् पुण्यं जायते तत् "स्वर्गायानन्त्याय च" इति कौटिल्यमतम्। तस्यातिक्रमे तु लोको वर्णसांकर्यादुच्छिद्येत। तथा स आह—

"व्यवस्थितार्यमर्यादः कृतवर्णाश्रमस्थितिः।
त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति॥"३

इत्यात्मसम्पदुपेतो नीतिज्ञो राजा खलु क्षुद्रस्य विषयस्याधिकारी अपि सर्वविधप्रकृतिसम्पत्सम्पन्नश्चातुरन्तः सम्राड् भवति। कौटिल्यमते अखिड्-

---

१ अर्थशास्त्र, ३।१३ २ अर्थशास्त्र, ३।३
३ अर्थशास्त्र, १।३

वर्गत्यागपूर्वक इन्द्रियजयः, विद्यावृद्धैः संयोगेन स्वकीयप्रज्ञाविकाशः, चारनियोगेन दृष्टिः, कार्योत्थानेन प्रजानां योगक्षेमसाधनम्, कर्त्तव्यानुशासनेन प्रजानां स्वधर्मे प्रतिष्ठापनम्, विद्योपदेशद्वारा प्रजानां विनयशिक्षादानं, समुचितेषु कार्येष्वर्थनियोगेन लोकप्रियत्वलाभः, हितसाधनेन च स्वकीयवृत्त्यवलम्बनम् इति राज्ञ आदर्शचिन्नं स्यात्। "राज्ञो हि व्रतमुत्थानम्"। अर्थस्य मूलमुत्थानमेव। देवानां प्रियः प्रियदर्शी सम्राट् अशोकोऽप्युद्घोषयामास—"कतव्यमते हि मे सवलोकहितं तस च पुन एस मूले उस्टानं च अथसंतीरणा च"१ इति। राजानमुत्थानगुणान्वितमनुसृत्यैव तद्भृत्या अपि तद्गुणविशिष्टा एव जायन्ते। राजानं तु कर्त्तव्येष्वनवहितं दृष्ट्वा तेऽपि प्रमाद्यन्ति "कर्माणि चास्य भक्षयन्ति।" राजप्रजयोः सम्बन्धः खलु पितापुत्रयोरिव सुमधुरो घनिष्ठश्च स्यात्। कौटिल्यः स्वयमेवमाह—

"प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।
नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्॥"२

इति।

कौटिल्यस्य हि राजकर्त्तव्यविषये स्वकीयान्यवधारणानि कानिचिदासन्। एवं हि तन्मते धर्मार्थकामेषु त्रिवर्गेष्वर्थ एव धर्मकाममूलत्वात् प्रधानम्। किञ्च, राजा न खलु स्वपरिवारस्थेष्वपि स्त्रीपुरुषेषु विश्रब्धः स्यादित्यपि मन्यतेऽसौ। राजपुत्रा अपि न सर्वथा विश्वासभाजनतामर्हन्ति। एवं "कर्कटसधर्माणो हि जनकभक्षा राजपुत्राः"। अतो जन्मप्रभृति ते रक्षणीयाः। परं राजकुलमहाराजपुत्रा यदि अविनीताः स्युस्तर्हि अरिणा आक्रान्ताः क्षणादेव "काष्ठमिव घुणजग्धं" भज्येरन्। अतः "न चैकपुत्रमविनीतं राज्ये स्थापयेत्।" आत्मरक्षार्थं राजा सदैवावहितः स्यात्। धर्मपत्नीसकाशे सिद्धतापससकाशे तथान्यत्र च रक्षिपरिवेष्टितः सन् गच्छेत्। औषधमद्यादिकं तथान्नव्यञ्जनादिकं च विषशुद्धं न वेति परीक्ष्य सेवेत। शय्यापि तेनोत्तमं परीक्षणीया।

---

१ अशोकशिलालेख, ६ गिरनारशाखा ("कटवियमते हि मे सवलोकहिते तसा पुना एसे मूले उठाने अठसंतिलना चा" कलसीशाखा)

२ अर्थशास्त्र, १ १९

कौटिल्यस्य राजनीतौ स्वैराचारः कदापि न दत्तप्रश्रयः। तत्र हि सचिवायत्तस्य राजतन्त्रस्यैव निदर्शनं दृश्यतेतरम्। "सहायसाध्यं राजत्वं चक्रमेकं न वर्त्तते"१ इत्यमात्यगुणसम्पदां सम्यङ्निरूपणेन राज्ञा धीसचिवाः कर्मसचिवाश्च नियोज्याः। धर्मोपधाकामोपधार्थोपधाभयोपधाभिः परिशुद्धा एव सचिवा नियोगमर्हन्ति। मन्त्रिसंख्याविषये कौटिल्यमतमेवमुपस्थापितम्— "मन्त्रिभिस्त्रिभिश्चतुर्भिर्वा सह मन्त्रयेत।"२ तत्र "आत्ययिके कार्ये मन्त्रिणो मन्त्रिपरिषदं चाहूय ब्रूयात्। तत्र यद् भूयिष्ठाः कार्यसिद्धिकरं ब्रूयुस्तत् कुर्यात्॥"३

कौटिलीयराजनीतौ गूढ़पुरुषनियोगविषये यदालोचितं तत्तु अधुनातनानामपि राजनीतिधुरन्धराणां विस्मयमावहति। प्राचीनभारतवर्षे शासनकार्यनिर्वाहार्थं नियुक्तानामध्यक्षादीनां कर्त्तव्यस्य सुसमाधानं गूढ़पुरुषाणां सहायतामृते नैव सम्भवति। गूढ़पुरुषप्रणिधेः नियमा गूढ़पुरुषाणां च विविधा भागाः कौटिल्येन सविशदमुपन्यस्ताः। प्रच्छन्नं चरन्तस्ते गूढ़पुरुषा राजानं प्रति प्रजानां मनोभावं छलेन ज्ञात्वा राजानं ज्ञापयन्ति। अमात्यादीनां राजपदोपजीविनां राज्ञि अनुरागापरागौ तेषामेव सहायतया ज्ञातुं शक्यम्। किञ्च, प्रजाकृतानामपराधानां परिज्ञानं परराज्यस्य कोपबलसेनाबलयोः परिज्ञानं तथाग्निविषादिप्रयोगेन दूष्यजनानां शत्रूणां च उपांशुवधस्योपायज्ञानं कण्टकशोधनव्यापृतानां विचारकाणां च साहाय्योपायज्ञानमपि ते साधयन्ति। किञ्च, उभयवेतननामधारिणः केचन गूढ़पुरुषास्तदानीं सन्ति ये तु वर्त्तमानकालीनानां Double Cross इत्यभिधेयानां गुप्तचराणां साजात्यमावहन्ति। ते हि स्वप्रभोर्वेतनभोगिनः सन्तः शत्रुराज्ये गुप्तचरवृत्तिं कुर्वन्ति। परन्तु स्वप्रभोरनुमोदनेनैव प्रभुस्वार्थं साधयितुं शत्रुराजस्यापि वेतनं गृहीत्वा तत्कार्यमपि साधयन्ति। तेषां विश्वासभङ्गभिया राजा स्वराज्ये तेषामसन्निधानकाले तदीयस्त्रीपुत्रादिकं स्ववश्यं कृत्वा गृह्णाति। अर्थशास्त्रवर्णितदूतप्रणिधिरपि चरप्रणिधेरङ्गविशेषतया कथयितुं पार्यते। गूढ़पुरुषाः स्वप्रकाशचरा दूतास्तु

१ अर्थशास्त्र, १।७
२ अर्थशास्त्र, १।१५
३ अर्थशास्त्र, १।१५

प्रकाशचरा इत्येतावन्मात्रो भेदः। दूतानां कर्त्तव्यजातं क्लेशकरं खलु। "दूतमुखा वै राजानस्त्वं चान्ये च। तस्मादुद्धृतेष्वपि शस्त्रेषु यथोक्तं वक्तारः। तेषामन्तावसायिनोऽप्यवध्याः, किमङ्ग पुनर्ब्राह्मणः। परस्यैतद्वाक्यमेष दूतधर्मः"१ इति दूतविषये कौटिल्यपादानां समस्तं विशदं मतम्।

१। अर्थशास्त्र, १।१६

# चतुर्थोऽध्यायः

## विद्यासमुद्देशः

विद्याविनीतो हि राजा सप्ताङ्गं राज्यं यथार्थं शासितुमीशः। तत्र विद्यानां संख्यामधिकृत्य कौटिल्यपूर्वाचार्या विप्रतिपद्यन्ते। आन्वीक्षिकी त्रयी वार्ता दण्डनीतिरिति चतस्र एव विद्या इति तु कौटिल्यमतम्। मानवानां मते आन्वीक्षिक्यास्त्रयीविशेषत्वात् त्रय्यादयस्तिस्र एव विद्याः। बार्हस्पत्यानां मते तु "वार्ता दण्डनीतिश्चेति एव द्वे विद्ये संवरणमात्रं हि त्रयी लोकयात्राविदः।" औशनसानां मते तु दण्डनीतिरेका विद्या। "तस्यां हि सर्वविद्यारम्भाः प्रतिबद्धाः।" कौटिल्यमते त्वान्वीक्षिक्यादिदण्डनीत्यन्ताश्चतस्र एव विद्याः। आभिर्विद्याभिर्धर्मार्थौ विद्याद् जन इति आसां विद्यात्वम्।

तत्रान्वीक्षिकी का? प्रश्नेऽस्मिन् कुल्लूकपादा आहुः—"तर्कविद्या भूताद्युक्तिप्रत्युत्तरोपयोगिनी आन्वीक्षिकी"[१] इति। न्यायभाष्यकाराणां वात्स्यायनानां मते तु "प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा, तया प्रवर्तत इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम्"[२] इति। कौटिल्यस्त्वाह—"सांख्यं योगो लोकायतं चेत्यान्वीक्षिकी" इति। सांख्ये खल्वनुमानेन विभिन्नानां पदार्थानामस्तित्वमुपपाद्यते। तत्र प्रकृतिपुरुषयोः संगतौ सत्यामेव सृष्टिरिति प्रतिपादितम्। वैदान्तिकैस्तु सांख्यसिद्धान्ता बहुत्र विरुध्यन्ते। तथा च ब्रह्मसूत्रम्—"रचनानुपपत्तेश्च नानुमानम्"[३] इति। सांख्यशास्त्रं किल प्राचीनतमशास्त्रेष्वन्यतमम्। अश्वघोषस्य बुद्धचरितग्रन्थे अड़ारर्षेः सकाशाद् बुद्धः सांख्यमधिगतवानिति वर्णितः। कस्तावद् योग इति? तत्र पतञ्जलिराह—"योगश्चित्तवृत्तिनिरोधः"[४] इति। व्याख्यातं च तद् भाष्ये—"चित्तस्य निर्मलसत्त्वपरिणामरूपस्य या वृत्तयोऽङ्गाङ्गिभावपरिणामरूपास्तासां निरोधो बहिर्मुखतया

---

१ मनुसंहिता, ७।४३

२ न्यायभाष्य, १।१।१

३ ब्रह्मसूत्र, २।२।१

४ पातञ्जलदर्शन, १।२

परिणतिविच्छेदादन्तर्मुखतया प्रतिलोमपरिणामेन स्वकारणे लयो योग"१ इति। अत्र ध्यानधारणासमाध्यादिकं मोक्षलाभोपायत्वेन निर्दिश्यते। कौटिल्यवचनात् प्रतीयते सांख्ययोगौ विद्याया द्वे विभिन्ने एव शाखे। भगवद्गीतायां तु—"सांख्ययोगौ पृथग्बाला: प्रवदन्ति न पण्डिता"२ इत्युच्यते। कथं तर्हि तयोर्भेद इति उक्तमिति संशयः। तत्र वक्तव्यम्—कौटिल्योपवर्णितो योगो गीतोपवर्णिताद् योगात् पृथगेव। तथा हि गीतायां यो योग उच्यते स हि चित्तवृत्तिनिरोधरूपः। कौटिल्याभिप्रेतो योगस्तु वैशेषिकदर्शनमेव। किमत्र प्रमाणं तावत् इति चेदुच्यते—वात्स्यायनन्यायभाष्यमेवात्र प्रमाणमिति। तत्र हि सांख्यं योगश्च पृथगेवेति प्रतिपादितम्—"यथा नासत आत्मलाभो न सत आत्महानमिति सांख्यानाम् गुणविशिष्टाच्चेतनादसदुत्पद्यत उत्पन्नं निरुध्यत इति योगानाम्"३ इति। उद्योतकरस्य न्यायवार्त्तिकग्रन्थेऽपि अनयोः कृत्स्नत एव भेद इत्युपपादितम्—"भौतिकानीन्द्रियाणीति योगानामभौतिकानीति सांख्यानाम्"४ इति। वैशेषिकदर्शने एवेन्द्रियाणां भौतिकत्वमुदाहृतम्। अत उद्योतकरमतेऽपि योगो वैशेषिकदर्शनमिति प्रतिभाति। वैशेषिकाचार्याणां मते परमाणुद्व्यणुकत्रसरेण्वादिक्रमेण द्रव्योत्पत्तिर्जायते। परमाणूनां योगेनैव द्व्यणुकाद्युत्पत्तिः। अत एवास्य वैशेषिकदर्शनस्य योग इति नाम्नापि व्यपदेशः। H. Jacobi महोदयानां मते तु कौटिल्यार्थशास्त्रे वैशेषिकदर्शनस्योल्लेखानुपलब्धेरिदं कौटिल्योत्तरकालवर्ति एव स्यादिति। इदं तु मतं नादुष्टमिति प्रतिभाति। तथा हि कुत्रापि ग्रन्थे कस्याप्युल्लेखाभावो न हि तस्य कालविषये किञ्चिदपि प्रमाणमावहति। अयं तु दोषः पाश्चात्त्यदर्शनेषु Argumentum-ex-silentio इति व्यपदिष्टः। अपरं च, कौटिल्येन वैशेषिकदर्शनं तद्ग्रन्थे उल्लिखितं, तस्य दर्शनस्य वैशिष्ठ्यादिकमपि तेन ज्ञातमासीदिति तद्ग्रन्थादेव प्रतीयते। अत्र उद्देश्यविशेषप्रणोदित एवासौ वैशेषिकदर्शनस्थले योगपदमुल्लिखति। चार्वाकदर्शनमेव लोकायतपदेनोच्यते।

त्रयीपदेन वेदा उच्यन्ते। केचित्तु ऋग्वेदः सामवेदो यजुर्वेदश्च वेदा इति

१ भोजवृत्ति, १।२

२ श्रीमद्भगवद्गीता, ५।४

३ न्यायसूत्र, वात्स्यायनभाष्य, पृ. ४९

४ न्यायवार्त्तिक, पृ. १०५

वदन्तोऽथर्ववेदस्य वेदत्वं न स्वीकुर्वन्ति। अन्ये तु गद्यपद्यगानात्मकास्त्रयोऽवयवा विद्यन्ते यत्र तदेव त्रयीपदवाच्यमिति मन्यमानाथर्ववेदस्यापि वेदत्वं समुद्-घोषयन्ति। तत्र कौटिल्य एवमाह—"सामर्ग्यजुर्वेदास्त्रयस्त्रयी। अथर्व-वेदेतिहासौ च वेदाः"१ इति। इतिहासवेदपदेन किमुच्यते इति तु संशया-स्पदम्। केचिदितिहासवेदपदेन ब्राह्मणान्यवबुध्यन्ति। ब्राह्मणेषु हि मनुमत्स्य-कथादीन्यैतिहासिकाख्यानानि विद्यन्ते। गणपतिशास्त्रिमहोदयानां मते तु महाभारतादिरितिहासवेदः। अत्र तु न किमपि प्रमाणमस्ति। त्रयीपदस्य प्रयोगा बहुत्रैव काव्यादिषूपलभ्यते। सर्वत्रैव च त्रय्याः पूज्यत्वमुद्घुष्यते। चार्वाकपन्थिभिस्तु त्रय्याः प्रामाण्यं न स्वीक्रियते। एवं तेषां सर्वविदितं मतमस्ति "त्रय एव वेदस्य कर्त्तारो भण्डधूर्तनिशाचरा"२ इति। अपि च उक्तमेव—

"अग्निहोत्रं त्रयोवेदास्त्रिदण्डं भस्मगुण्ठनम्।
बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः॥"३

वार्तापदेन तु कृषिपशुपाल्ये वाणिज्यं च लक्ष्यते। सा च वार्ता "धान्यपशुहिरण्यकुप्यविष्टिप्रदानादौपकारिकी।"४ तत्र कुप्यपदं यत्—

"रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून् स्त्रियः।
सर्वद्रव्याणि कुप्यं च यो यज्जयति तस्य तत्॥"५

इति मनुसंहितायाः श्लोके उच्यते तद्व्याख्यानावसरे कुल्लूकपादा आहुः—"कुप्यं च सुवर्णरजतव्यतिरिक्तं ताम्रादिधनम्"६ इति। स एवार्थोऽत्रापि साधुरिति भवति। विष्टिस्तु विनैव पारिश्रमिकं कर्मकरणम्।

दण्डनीतिस्तु आन्वीक्षिक्यादिविद्याभिरर्जितं रक्षतीति तस्या अनन्यं गुरुत्वं राजनीतिशास्त्रे। तथोक्तम् "आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधनो दण्डः। तस्य नीतिर्दण्डनीतिः"७ इति। अलब्धलाभो योगः, लब्धपरिरक्षणं च क्षेमः।

१ अर्थशास्त्र, १।३
२ सर्वदर्शनसंग्रह, पृ. १०
३ सर्वदर्शनसंग्रह, पृ. १०
४ अर्थशास्त्र, १।४
५ मनुसंहिता, ७।९६
६ कुल्लूकटीका, मनुसंहिता, ७।९६ (अन्यत्र कुल्लूक आह —"कुप्यस्य ताम्रलोहादेः" मनु ११।६७)
७ अर्थशास्त्र, १।४

अतो दण्डनीतिः "अलब्धलाभार्था, लब्धपरिरक्षणी, रक्षितविवर्धनी, वृद्धस्य तीर्थेषु प्रतिपादनी च।"१ तथाह मनुः—

"अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया।
रक्षितं वर्द्धयेद् वृद्ध्या वृद्धं दानेन निक्षिपेत् ॥"२

इति। अयं तु दण्डो न राज्ञा यथेच्छं प्रयोक्तव्यः। दत्तस्यानाचरणादनुचितेन वा प्रवर्तनात् सर्वनाशमभियन्ति देशवासिनः। शास्त्रानुसारेण प्रयुक्तो दण्डः प्रजानां सुखायानुरागाय च सम्पद्यते। यदि राजानलसो भूत्वा दण्डप्रणयनं न कुर्यात् तर्हि मात्स्यन्यायोऽनिवार्य एव भवेत्। "शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः।"३ अतएवोक्तं "दण्डे वैनयिकी क्रिया" इति। कौटिल्योऽपि स्वकीयं सुचिन्तितमभिमतमभिव्यनक्ति—"तीक्ष्णदण्डो हि भूतानामुद्वेजनीयः। मृदुदण्डः परिभूयते। यथार्हदण्डः पूज्यः"४ इति।

एवं कौटिल्येन चतस्र एव विद्या इति प्रतिपाद्यते। अन्यत्र तु विद्यासंख्या अन्यथापि दृश्यते। केषाञ्चिन्मतेन चतुर्दश एव विद्या—

"पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥"५

अन्ये अष्टादश एव विद्या इत्याहुः—

"आयुर्वेदो धनुर्वेदो गान्धर्वश्चैव ते त्रयः।
अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव ताः ॥"६

तान्त्रिकाणां मते तु—"एका विद्या दैवी विद्या" इति। इन्द्रस्तत्र तस्यै देव्यै श्रद्धामर्पयन् दृश्यते—"आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्त्वमेव च"७ इति।

---

१ अर्थशास्त्र, १।४ २ मनुसंहिता, ७।१०१
३ मनुसंहिता, ७।२० ४ अर्थशास्त्र, १।४
५ याज्ञवल्क्यसंहिता, १।३
(अङ्गानि चतुरो वेदा मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश।' विष्णुपुराण, ३।६।२८)
६ विष्णुपुराण, ३।६।२८ ७ देवीपुराण, ३१।१६

# पञ्चमोऽध्यायः

## प्रारम्भिको माङ्गलिकांशः

अथ राजनीतिधुरन्धराः कौटिल्यमहाभागा अर्थशास्त्रग्रन्थं प्रणेतुकामाः प्रारीप्सितग्रन्थस्य निर्विघ्नपरिसमाप्तये मंगलमाचरितुमुपनिबध्नन्ति—"ॐ नमः शुक्रबृहस्पतिभ्याम्" इति ।

"ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तेन मांगलिकावुभौ ॥"

इत्युक्तदिशा श्रवणमात्रेण ओङ्कारस्य मंगलरूपतावसेया । अथवा ओमिति शुक्रबृहस्पत्योर्विशेषणम्, तेन तयोर्ब्रह्मरूपत्वमवगम्यते । भीष्मेण इदमेवौशनस-सम्मतमर्थशास्त्रमद्य यावत् प्रचलितमस्ति इति महाभारत उक्तत्वात् तत्समय-पर्यन्तमौशनसशास्त्रस्य प्रचारनिश्चयात्, सञ्जीवनीमन्त्रस्य शुक्रेणैवोपलब्ध-त्वाच्चादौ तन्नामग्रहणम् । "अल्पाच्तरत्वाच्चेमि"[1]ति सूत्रात् शुक्रशब्दस्य पूर्वनिपात इति जयमंगला ।

एतन्नमस्कारो गुरुनमस्कारवद् भगवन्नमस्काररूप इति शुक्रबृहस्पत्यो-र्भगवतोस्तेजांशरूपत्वात् सिध्यति । तयोस्तदशत्वं भगवद्गीतायाम्—

"पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम्"[2]
"मुनीनामप्यहं व्यासः कवीनामुशनाकविः ।"[3]

तथा च शुक्रे बृहस्पतौ च वर्त्तमाना भगवत्कला नमनेन प्रसन्ना सती बुद्धिस्फीतिं प्रतिभां च विस्तारयिष्यतीति सिध्यति ।

अत्र च मंगलस्य निबन्धनेन नृपतन्त्रार्थमपेक्षणीया धृतिर्यन्त्रिणि ग्रन्थकर्त्तर्य-स्तीति स्फुटीभवति । तस्याः खलु सप्तसु राज्यांगेषु महत्यावश्यकता वर्त्तते । तथा हि लोकतन्त्रपराधीनमेव हि नृपतन्त्रम् । यतः

'वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥'[4]

---

१ पाणिनि, २।२।३४
२ श्रीमद्भगवद्गीता, १०।२४क
३ श्रीमद्भगवद्गीता, १०।३७ख
४ मनुसंहिता, २।१३६

इति मनूक्तदिशा धनिकैर्वन्धुभिर्वयोज्येष्ठैः कर्मकुशलैर्विद्यावद्भिश्च यदा मान्यो भवति तदैव तत्र नृपत्वं सम्भाव्यते। एतत्कर्तृकमान्यतायामेव च शुक्लपक्षे कला आददानः शशाङ्क इव महीपतिश्चिरं वर्धते, नान्यथा। लोकतन्त्रं च संवासिमतप्राप्तिरूपमेव। लोकसम्मतत्वरूपलोकमतलाभश्च सत्त्वारोग्यशीलास्तब्धताऽचापल्यवतामेव चिरस्थायी भवति। उक्तेषु सत्त्वादि-गुणेषु सत्त्वमेव प्रधानतममभ्यर्हितमेतस्मिन् शास्त्रे तस्यैव राज्यफलहेतुत्वात्। तत्र सत्त्वस्वरूपम् "व्यसनेऽभ्युदये यदविकारकरम्"१ इति कामन्दकीयव्याख्या-यामुक्तं, धृतिस्वरूपविवेचने "या शोकहर्षयोरैकरूपा सैवधृतिर्भवेत्"२ इति भाव-प्रकाशने, "लोभशोकभयादिजनितोपप्लवनिवारणकारणीभूतश्चित्तवृत्तिविशेषो धृति"३रिति रसगङ्गाधरे चोक्तम्। तदुभयपर्यालोचनायां सत्त्वं धृतिभाव-रूपमिति सिध्यति। धृतिस्वरूप आलोच्यमाने

"विवेकः श्रुतिसम्पत्तिर्गुरुभक्तिस्तपस्विता।
एते विषयभावेन करणत्वेन च स्थिताः॥
इष्टाधिकानामिष्टानां लाभस्तु विषयत्वतः।
व्रीडाकरणभावेन विभावा यत्र सम्मताः॥
प्राप्तभोग्योपभोगस्य त्वप्राप्तातीतभोगयोः।
जीर्णे नष्टे चाविषादोऽननुशोचनमित्यपि॥
अनुभावद्वयं यत्र धृतिं तां ब्रुवते बुधाः।"

इति संगीतरत्नाकरोक्तदिशा विवेकश्रुतिसम्पत्तिगुरुभक्तितपस्वितैतच्चतुष्टयमेव समुदितं धृतिरित्युच्यते।

तत्र तत्राक्षेपसमाधानानां बहुतरमुपलब्धेः श्रुतसम्पत्तिः "सुनिपुणमुपसेव्य सद्गुरुं शुचिरनुवृत्तिपरो विभूतये"४ इति कामन्दकवचनतः स्फुटा।

"कुलशतप्रतिग्राहकाणामिति लोकप्रवादः" इति जयमंगलोक्तेः, अभि-चारादौपनिषत्प्रकरणस्य सफलानुष्ठातृत्वात् च तस्य तपस्वित्वं निर्विवादम्। मंगलग्रन्थेनानेन तस्य गुरुभक्तिरपि धृतिस्वरूपघटिका स्फुटा भवति।

---

१ कामन्दकीयनीतिसार, (तुलनीय "अनिन्दाकारकृत्येषु स्वधर्मपरिपालनम्") ३।२४

२ भावप्रकाशन, २।पृ. २९, २ ३ रसगङ्गाधर, १, पृ. ९८

४ कामन्दकीयनीतिसार, १।६७

अर्थशास्त्रारम्भस्य प्रयोजनं त्वेवं द्रष्टव्यम्। स्थापितेति लोकतन्त्रे लोकमतं शासनसञ्चालनायापेक्षितं स्वयमेव न प्राप्यते। कथञ्चित् प्राप्तमपि सत्त्वस्य शीलस्य चाभावेऽननुकूलं भवति। तथा सति स्तब्धता मानः परस्परविरुद्धार्थकबुद्धीनामव्यवधानेनोत्पत्तिरूपा चपलता च नैयत्येन भवति। एतेषु दोषेषु समुद्भूतेषु सत्सु भ्रान्तिप्रमादविप्रलिप्सादयो दोषाः स्वयमेवोत्पद्यन्ते। तेन लोकमतं प्रतिकूलं भवति। नियतफलप्राप्तिरपि शास्त्रमन्तरा न भवितुमर्हति। नियततया सन्दिग्धे फले प्रवृत्तिस्तु नित्येत्यपसिद्धान्तः। अतः फलप्रमाज्ञानार्थं शास्त्रारम्भस्यावश्यकतास्ति। शास्त्रप्रसूतं ज्ञानं पूर्वपरम्परया सर्वज्ञेश्वरात् प्राप्तमिति। तदेव ज्ञानं यद्यस्मन्निष्ठं भवति तदा तत्र नित्यज्ञानावृत्तिविषयताशून्यत्वरूपं प्रमाणं चाक्षुण्णं भवति।

शास्त्रप्रसूतमीशसमवेतज्ञानसमानाकारकं ज्ञानमस्मन्निष्ठं चेत् सत्त्वाय भवति इति प्रत्यभिज्ञादर्शने उक्तम्—

स्वांगरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या।
माया तृतीये ते एव पशोः सत्त्वं रजस्तमः॥ इति।

यदा किल ईशसमवेतं ज्ञानमस्माकं भातं भवति तदा तद् भानं प्रमाशब्देन बोध्यते। तथोक्तं भावप्रकाशने—

"ज्ञानप्रमा च सानन्दा तस्याः सत्त्वं प्रजायते"[१] इति। सत्त्वं राज्यमूलम्। एतस्य सत्त्वस्य बलेनैव—

"दिव्येन्द्रजालरम्यार्थदर्शनाभीष्टसिद्धिदः।
अद्भुतः सोऽभिनेतव्यः श्लाघारोमाञ्चदानतः॥"[२]

इति नाट्यदर्पणोक्तरीत्या रम्यार्थदर्शनाभीष्टसिद्धिद्वारा जनश्लाघ्यतादिकमुपलभ्य राजा सर्वेषां ध्यानं स्वस्मिन् प्रापयति इति सत्त्वमेव लोकतन्त्रमूलमिति। अत एवोक्तं कामन्दकीयजयमंगलायाम्—"अप्रतिष्ठितराज्यस्य परराज्यात्मसात्करणासम्भवात् स्वराज्यप्रतिष्ठापनार्थं......तत्रायं प्रथमोपायो यद् विद्यावृद्धैः सार्धं विद्याचिन्ता, विद्याप्रतिबद्धत्वाल्लोकस्थितेः।" इति।

---

१ भावप्रकाशन, २, पृ. ४१, १८

२ तुलनीयम् भावप्रकाशन, पृ. ३३, २२; ४४, १५; ४७, १८; ५५, ११; ६१, १२; २३६, ४

सत्त्वं विना अविश्वास्यता ।

यद्यपि पूर्वोक्तसत्त्वविधुरेषु राज्यसञ्चालकत्वमिदानीं क्वचित् दृश्यते, तथापि तेषु लोकमतं पूर्ववदेवानुकूलमस्तीति वक्तुं न शक्यते । भियेतनामयुद्धादिस्वरूपस्य पाउण्डमुद्राया अवमूल्यनाद्युत्तरघटनाया वर्त्तमानस्वरूपस्य च पर्यालोचनयाऽसात्त्विकेषु तत्तत्सञ्चालकेषु अविश्वासस्योत्तरोत्तरं विवर्धमानयोपलब्धेः । शास्त्राभावेऽपि प्रवृत्तिः ।

अथ शास्त्राध्ययनादिकं विनापि

"अर्थशब्दवपुः काव्यं रसैः प्राणैर्विसर्पति ।
अञ्जसा तेन सौहार्दं रसेषु कविमानिनाम् ।।
न तथार्थशब्दोत्प्रेक्षा श्लाघा काव्ये यथा रसः ।
विपाकजं कमप्याम्रमुद्वेजयति नीरसम् ।।"

इत्युक्तन्यायेन रसात्मकप्रतीतेर्लौकिकेषु उत्पादयितुं शक्यतया तया लोकसम्मतत्वप्राप्तिसम्भवेन शास्त्रस्यारम्भो निष्प्रयोजन एवेति चेदत्रोच्यते ।

तत्र तावदादौ रसप्रतीतिः कथं भवतीति विचारणीयम् । तां प्रति विभावानुभावयोर्व्याप्तिवासना स्थायिभाववासना काव्यार्थभावना चेति समूहः कारणम् । तदुक्तं काव्यप्रदीपव्याख्यायां तत्सदुपाख्यवैद्यनाथविरचितायाम्—"एवं च रत्यादिनिरूपितविभावादिनिष्ठव्याप्तिग्रहजन्योद्वुद्धसंस्कारः काव्यार्थभावनाजन्यसंस्कारः रत्यादिवासना चेति" इति त्रयं रसाभिव्यक्तिहेतुः ।

तत्र विभावानुभावव्याप्तिवासना स्थायिभाववासना च प्रसिद्धैव । काव्यार्थभावनां तु चित्रतुरगन्यायेन नाटकदर्शिनामात्मनि सञ्जायमाना प्रतीतिः । सा च चित्रत्वतुरगत्वोभयव्यासक्तैकप्रकारताकचित्रतुरगोभयव्यासक्तैकविशेष्यताका । एवं च रामत्वनटत्वोभयपर्याप्तैकप्रकारताकरामनटोभयपर्याप्तैकविशेष्यताकप्रतीतिर्नाट्यस्य दर्शनसमये सामाजिकेषु भवति । सेयं साहित्यस्य महान् व्यापारः ।

शास्त्राभावे दोषः ।

इदमेव वासनात्रयं रसाभासमुत्पादयितुं समर्थं भवति, परन्तु रसतदाभासयोरयं विरोधः । यदि विभावानुभावव्यापारव्याप्त्यादिसंस्कारः प्रमाजन्यो भवेत् तर्हि तज्जन्या प्रतीतिः 'रस' इत्यभिधीयते, यदि चोक्तसंस्कारो भ्रमजन्यो

भवेत् तदा तज्जन्या प्रतीतिः 'रसाभास' इति निर्दिश्यते। सत्यामेवंविधायां स्थितौ यदि शास्त्रजन्यं ज्ञानं न भवेत् तदा भ्रान्त्या उक्तव्याप्तिसंस्कारस्योद्बोधे रसाभासप्रतीतेरुत्पद्यतोपहास्यं स्यात्। अतः प्रभात्मकव्याप्तिज्ञानार्थं शास्त्रस्यास्यावश्यकता स्वीकर्तव्या। तथा चार्थशास्त्रमपि तन्न्यायेन प्रमितव्याप्त्यादिनिर्णयायावश्यकमारम्भणीयमिति सिध्यति।

ज्ञानप्रभायां तपःप्रणिधानं च सहकारि।

एवं रीत्या ईशसमवेतज्ञानप्रभा भावप्रकाशनोक्ता शास्त्रचिन्तनेन सत्त्वलाभ इति निर्णीतम्। पूर्वधृतेः सत्त्वस्वरूपं यदुक्तं तदप्यत्रैव पर्यवसितं भवति। अत्र ज्ञानप्रभायां तप ईशप्रणिधानं चादृष्टद्वारा सहकारीत्यपि न विस्मर्त्तव्यम्। तदुक्तं वैशेषिकप्रशस्तपादभाष्ये "आम्नायविधातॄणामृषीणामतीतानागतवर्तमानेषु अतीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिबद्धेष्वनुपनिबद्धेषु चात्ममनसोः संयोगाद् धर्मविशेषाच्च यत्प्रातिभं यथार्थनिवेदनमुत्पद्यते तदार्षमित्युच्यते"१ इति।

अत्र भाष्ये धर्मविशेषो यथार्थार्षज्ञानकारणमिति यदुक्तं तस्य स्फुटीकरणं न्यायकन्दल्यां तपःसमाधिः इति कृतमस्ति। तद् यथा—"तस्योत्पत्तिरनुपपन्ना कारणाभावादित्यनुयोगे सतीदमुक्तं धर्मविशेषादिति, विशिष्यत इति विशेषो धर्म एव। विशेषो धर्मविशेषः। विद्यातपःसमाधिजो यो धर्मस्तस्मात् प्रतिभोदयः।"२ इति।

इति वदता पतञ्जलिना स एव विषय उक्तः। शौचसन्तोषेति सूत्रे "तपः स्वाध्यायेश्वरप्रणिधानानां नियमेष्वन्तर्भावितानां पुनरत्र ग्रहणं धर्मविशेषस्याशुलाभप्रदर्शनार्थम्।" तदुक्तं नारायणतीर्थैः—

"यद्यपि योगांगेषु नियमे शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि पञ्चोक्तानि, तथापि प्रकृतत्रयाणां दृष्टादृष्टद्वारा आशुकायेन्द्रियमनोजयादिविशिष्टफलश्रवणाद् दर्शनाच्च ततः पृथगुक्तिरिति मन्तव्यम्" इति।

आनन्दप्रभोपयोगः!

सेयं वर्णिता ज्ञानप्रभा उपर्युक्तसत्त्वपदार्थघटकस्य मनःप्रसादस्याभावे सुखाय शान्तये वा न भवति। यतो हि शास्त्रप्रसूतज्ञानोपलब्धावपि यदि

१ प्रशस्तपादभाष्य, पृ. २५८ २ न्यायकन्दली, पृ. २५८

विषयेषु प्रवृत्तिः रागद्वेषमूला तर्हि सा दोषजन्यत्वादजितेन्द्रियत्वे पर्यवसायिनी न प्रसादजनिका भवति रागद्वेषयोरतिप्रचुरत्वात् । अत एव "त्रिविधं नरकस्येदं द्वारं नाशनमात्मन"१ इत्युक्तम् ।

ईशसमवेतशास्त्रानुमोदिज्ञानपारतन्त्र्येण जायमाना प्रवृत्तिस्तु न रागद्वेषमूलिका भवति । एवं स्थिते जितेन्द्रियत्वं सत्त्वे स्थितिं च निष्पादयन्तीयं प्रवृत्तिर्मनः प्रापयति तेन सुखं शान्तिश्च भवतः । तदुक्तं गीतायां—

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ।।
प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ।।
नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ।।२ इति ।

अत्र मधुसूदनी टीका—"यामपि रागद्वेषाभ्यां वियुक्तै विरहितैरिन्द्रियैः श्रोत्रादिभिर्विषयान् शब्दादीननिषिद्धांश्चरन्नुपलभमानः प्रसादं प्रसन्नतां चित्तस्य स्वच्छतां परमात्मसाक्षात्कारे योग्यतामधिगच्छति । रागद्वेषप्रयुक्तानीन्द्रियाणि दोषहेतुतां प्रतिपाद्यन्ते । मनसि स्ववशे तु न रागद्वेषौ । तयोरभावे च न तदधीनेन्द्रियप्रवृत्तिः । अवर्जनीयतया तु विषयोपलम्भो न दोषमावहतीति न शुद्धिव्याघात इति भावः । एतेन विषयाणां स्वरूपमपि चेदनर्थकरणं सुतरां तर्हि भोगस्तेन जीवनार्थविषयान् भुञ्जानः कथमनर्थं न प्रतिपद्येतेति शङ्का निरस्ता" इति ।

नीतिशास्त्रेण सत्त्वोपलब्धिः ।

नीतिशास्त्रस्य विचारे क्रियमाणे सति सत्त्वगुणः किमुपलब्धुं शक्य इति प्रश्ने शक्य एवेति वदामः । तथा हि—

गीतायां मनः प्रसाद आत्मवश्यानां भवतीत्युक्तं स च हर्षादनतिरिक्त इति भावप्रकाशने उपलभ्यते । यथा—

हर्षो मनः प्रसादः स्यादीप्सितार्थोपसंगमात् ।
इष्टसंगमनाद् देवगुरुभर्तृप्रसादतः ।।

---

१ श्रीमद्भगवद्गीता, १७।२१क २ श्रीमद्भगवद्गीता, २।६४-६६
३ मधुसूदनसरस्वतीभाष्य, श्रीमद्भगवद्गीता, २।६४

अभिरूपोपभोगाच्च बन्धुतृप्तेः सुभोजनात् ।
अचिन्त्येष्टार्थसम्पत्तेर्जायते सर्वदा नृणाम् ।।
रोमाञ्चालिङ्गनस्वेदैर्ललितैः करताड़नैः ।
नेत्रवक्त्रप्रसादैश्च भाषितैर्मधुरैरपि ।।
त्यागदानप्रबन्धैः स्युरनुभावास्तु हर्षजाः ।।१ इति

तथा च नीतेर्वक्ष्यमाणस्वरूपे पर्यालोचिते उपर्युपवर्णिता सर्वविधापि हर्षसामग्री तत्र वर्त्तते यतो हि प्रमाणत्रयं, देशकालानुकूल्यं शक्तिं च पर्यालोच्य नीतिमता अग्रे पदं निधातव्यं भवति । एवं च फललाभो नियतः । अतस्तत्रा-नन्दप्रभारूपो मनःप्रसादोऽस्ति नवेति सन्देहस्यावसर एव नास्ति, ध्वनितं चैतन्नीतिसारे—

"आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती" इति ।

एतद् व्याख्यानं जयमंगलायां कृतम्—"सा च तस्याः प्रवर्त्तमानाया विघ्नेनानु-च्छेदात्" इति ।

नीतिविषये सतां स्वभावः ।

तस्मान्नीतिं पर्यालोच्यानुष्ठिते सत्त्वस्योपलब्धिर्नियतैव, अत एवात्र सत्त्वस्य नैयत्येन साधवः कस्मिन्नप्यवसरे नीतिं परित्यक्तुं नाभिलषन्तीति तत्स्वभाव उपवर्णितो मानसरामायणे

"सम शीतल न हि त्याग हि नीती
सरल सुभाउ सब हि सन प्रीती ।"२

ईशनिवासः सत्त्ववस्तु ।

सत्त्वगुणस्यास्पदं नीतिमत्त्वं येन धार्यते तस्य निर्मलं मनः गृहत्वेन वृणुते भगवानीश्वर इति श्रीतुलसीरामायणाज् ज्ञायते—

नीतिनिपुन जिन्ह कई जग लीका ।
घर तुम्हार तिन्ह कर मनु नीका ।।३

१। भावप्रकाशन, १। पृः २०, ४-१०
२। तुलसीरामायण, अरण्यकाण्ड ४५।२
३। तुलसीरामायण, अयोध्याकाण्ड, १३०।२

एवं च यो दोग्धा स ईशस्य कृपापात्रं भवेद् य ईशकृपापात्रं स एव विश्वास्यः सर्वैः प्रणम्यश्च भवति। तदुक्तं भागवते—

"यस्य प्रसन्नो भगवान् गुणैर्मैत्र्यादिभिर्हरिः।
तस्मै नमन्ति भूतानि निम्नमाप इव स्वयम्॥"१

तथा चेश्वरे प्रसन्ने योगक्षेमौ भविष्यत इति किमु वक्तव्यम्। तथा च श्रीमद्भगवद्गीतायाम्—

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥२ इति
नीतावुपेक्षितायां वेदस्याभिप्रायः।

परन्तु मिथ्याज्ञानजन्यवासनया "भीष्मः खल्वयमपवर्गः" "वहुभद्रकं मे लुप्येत" इति मत्वा आगमप्रमाणमनुमानं प्रत्यक्षं वावहेलयन्ति। तेषां वचसि कृतौ वा निष्फलत्वादप्रामाणिकत्वादसभ्यत्वादश्रद्धेयत्वाच्च गौरवं किं भवेत्? तदाह श्रुतिरपि—

"यस्तत्याज सखिविदं सखायं न तस्य वाच्यपि भागो अस्ति।
यदि शृणोति अलकं श्रृणोति न हि प्रवेद सूकृतस्य पन्थाम्॥"

इति। अतः साधवो मिथ्याज्ञानजन्यां वासनां तर्कवहुलेन मनसा दूरीकृत्य स्वीयं नीतिमत्त्वं सात्त्विकत्वं नापसारयन्ति। तदुक्तं हनूमत्सनकसंवादे मानसरामायणे—

सम दम नियम नीति नहि डोल हि।
परुष वचन कवहूँ नहि वोल हि॥३ इति
सत्त्वस्यारोग्ये सम्बन्धः।

आरोग्यदृष्ट्या विचार्यमाणेऽपि आनन्दप्रभासहचरितज्ञानप्रभाया नानाविधा मनसो रोगा दूरीभवन्तीति ज्ञापयितुं सुश्रुतसंहितासु सत्त्वस्वरूपं यदुपवर्णितम् तदपि मानसरामायणादौ निर्दिष्टं नीतितत्त्वं पुष्णाति, तद् यथा—

आस्तिक्यं प्रविभज्य भोजनमनुत्तापश्च तथ्यं वचः
मेधा बुद्धिधृतिक्षमाश्च करुणा ज्ञानं च निर्दम्भता।

---

१। श्रीमद्भागवत, ४।९।४७
२। श्रीमद्भगवद्गीता, ९।२२
३। तुलसीरामायण, उत्तरकाण्ड ३७।८

कर्मानिन्दितमस्पृहं च विनयो धर्मः सदैवादरा-
देते सत्त्वगुणान्वितस्य मनसो गीता गुणा ज्ञानिभिः ॥१ इति

किं च, उपर्युक्ता हर्षसामग्री सर्वापि नीतौ वर्त्तते इत्यानन्दप्रभोच्छलनं साहजिकमेव तथेशप्रभाया एव शास्त्रद्वारा ग्रहणाद् ज्ञानप्रभापि विवेकस्वरूपा-भूदिति हेतोर्नीत्यनुष्ठाने एकांगता सिद्धैव। तत्सिद्धत्वे सत्त्वगुणस्य प्रादुर्भावः, स चायं द्विविधो भवति। सकामोपासनया निष्कामोपासनया च। तत्र यदि सत्त्वगुणप्रादुर्भावः सकामस्योपासनाविषयः स्यात् तर्हि स तावन्मात्रमेव खलु दत्त्वा विश्राम्यति। यदि च निष्कामस्योपासनाविषयः स्यात् तर्हि स सञ्चीयमानमदृष्टं सर्वं सम्पादयितुं समर्थो भवति।

तस्य वाह्यस्वरूपमास्तिक्यं प्रतिभोज्यभोजनाद्यनुपदमुक्तमेव।

सत्त्वगुणाभावे दोषः।

केचिज् ज्ञानप्रभावमुपेक्ष्यानन्दप्रभामेव स्वायत्तीकर्त्तुं वाञ्छन्ति। तत्तु न युक्तम्। तत्र पूर्वमपेक्षित्वेनोक्ताया एकाग्रतायाः समाधावभ्यर्हिताया अभावः रजस्तमसोऽभिवृद्ध्यापद्येत। तत्र विवेकाभावेन च निष्फलत्वमपि सम्भाव्यते। नैतावन्मात्रेण विश्रान्तिः, किन्तु रजस्तमसि मनसः कामक्रोधाद्यनेकदुरपनेयरोग-कारणभूते भवतः, तेन जयहीनत्वं नियतं स्यात्। ततो जनापरागोऽप्यनुषक्तः। इत्यादयो दोषाः सत्त्वगुणावलम्वनाभावे मन्तव्याः।

इयं नीतिमत्ता येषु वर्त्तते ते यथा सन्त इति प्रोच्यन्ते तथा ऋषिशब्देनापि व्यवह्रियन्ते शास्त्रादौ। तद् यथा—

"नमः शास्त्राय महते त्रिवर्गस्यैकयोनये।
नमस्तस्य प्रणेत्रे च कौटिल्याय महर्षये ॥२"

तथा "वंशे विशालवंशानामृषीणामिव भूयसाम्।
दर्शनात्तस्य सुदृशो विद्यानां पारदृश्वनः ॥ इति

अधिकं सर्वं शब्दकल्पद्रुमे द्रष्टव्यम्।

यत् किलापस्तम्बेन धर्मसूत्रे३ अवरे ऋषयो न भवन्तीत्युक्तं तत् तु वेदस्य प्रथमाध्येतृत्वमिति व्याख्यानाभिप्रायेण वोध्यम्।

१। सुश्रुतसंहिता, पृः ६७६, ६।११
२। शङ्करार्य, १।१
३। आपस्तम्बधर्मसूत्र, १।२।५।३

पं स १५० ]

# षष्ठोऽध्यायः

## अर्थशास्त्रोपोद्घातः

मंगलाचरणानन्तरं तु कौटिल्यपादाः स्वग्रन्थमधिकृत्यैवमाहुः "पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि प्रायशस्तानि संहृत्यैकमिदमर्थशास्त्रं कृतम्"१ इति। तत्र पृथिव्या इत्यस्यार्थस्तु चतुर्वर्णाश्रमवत्या हिमवत्समुद्रान्तरवर्तिन्या भूमेरिति। तदुक्तं "यस्य प्रसराद् भुवनमित्या"दिकश्लोकव्याख्यायां जयमंगलायां—

"भुवनं चतुर्वर्णाश्रमो लोकः" इति।

एतावद्भूक्षेत्रमेव चक्रवर्तिक्षेत्रत्वेन व्यवह्रियत इत्यपि वोध्यम्। "लाभे पालने च" इत्यत्र निमित्तार्थकसप्तमी। निमित्तत्वं च—

स्वान्वयव्यतिरेकानुविधाय्यन्वयव्यतिरेकप्रतियोग्यवश्यानुष्ठानकत्वम्।

तच्च "राहूपरागे स्नायात्" "चर्मणि द्वीपिनं हन्ति" इत्यादौ स्फुटम्। एतद्विशेषस्तु भाट्टदीपिकायां चर्चितस्तत एव वोद्धव्यः। ईदृशं निमित्तत्वमर्थशास्त्रस्य लाभपालनयोश्च वर्त्तत इति "लाभे पालने च" इति सप्तम्या वोध्यते। अर्थादेतदर्थशास्त्रमनुष्ठानपर्यवसायितया चिन्तितं चेत् श्लाघामुत्पाद्य स्थायिलोकसम्मतिलाभपुरस्सरं पृथिव्या लाभपालनोपधायकं भविष्यति। अर्थशास्त्राभावे तु व्यापकाभावाद् व्याप्याभाव इति न्यायेन लाभपालने न भविष्यतः। तदुक्तम्—

आन्वीक्षिकीत्रयीवार्ता सती विद्या प्रचक्षते।
सत्योऽपि हि न सत्यस्ता दण्डनीतेस्तु विप्लवे ॥२

लाभो हि करादिग्रहणाद्युपयोगिसत्त्वोत्पादः। पालनं तावच्चतुर्वर्णाश्रमाणां मनस आकर्षणानुकूलो भयनिवृत्तिपोषणादिव्यापारः। तदर्थमिति

१। अर्थशास्त्र, १।१
२। कामन्दकीयनीतिसार, २।८ ( पाठभेदः विश्रमे for विप्लवे ).

सप्तम्यर्थः, तस्यार्थशास्त्रमित्यनेन सम्बन्धः। ननु वर्धनं सत्पात्रप्रतिपत्तिश्चार्थशास्त्रे फलत्वेन निर्दिष्टोऽस्ति, तदुक्तं नीतिसारे—

न्यायेनार्जनमर्थस्य वर्धनं रक्षणं तथा।
सत्पात्रप्रतिपत्तिश्च राजवृत्तं चतुर्विधम् ॥१ इति

तद्ग्रहणं मूलकृता कुतो न कृतमिति चेन्न। वर्धनस्य लाभे सत्पात्रप्रतिपत्तेश्च पालनेऽन्तर्भावात्। तदुक्तं नीतिसारव्याख्यायां जयमंगलायां "तस्यार्जनं त्रिविधं नवं भूतपूर्वं पित्र्यं च। रक्षणमपि द्विविधम्—स्वेभ्यः परेभ्यश्च। ननु रक्षितविवर्धनं वृद्धस्य तीर्थप्रतिपादनमपि गुणवति पुत्रे निक्षेपो वाश्वमेधादौ विनियोगो वा। तदुभयमपि सर्वथा रक्षणमेव" इति।

एकमपि प्राचीनमर्थशास्त्रं कौटिल्येनादृष्टं नासीदित्येव "यावन्ति" इति पदेन सूच्यते। अर्थशास्त्राणीत्यत्र अर्थशब्देन वृत्तिर्बोधनीया। तदर्थं शास्त्रमर्थशास्त्रम्। तानि हि वैशालाक्षौशनसबार्हस्पत्यादीनि। पूर्वाचार्यांश्च ब्रह्मानारदशुक्रबृहस्पतिभारद्वाजविशालाक्षभीष्मपराशरवातव्याधीन्द्रप्राचेतसमनुगौरशिरोव्यासादयः। तदुक्तम्—

एतत्ते राज्यधर्माणां नवनीतं युधिष्ठिर।
बृहस्पतिर्हि भगवान् नान्यं धर्मं प्रशंसति ॥
विशालाक्षश्च भगवान् काव्यश्चैव महातपाः।
सहस्राक्षो महेन्द्रश्च तथा प्राचेतसो मनुः ॥
भारद्वाजश्च भगवान् तथा गोरशिरो मुनिः।
राजशास्त्रप्रणेतारो ब्राह्मणा ब्रह्मवादिनः ॥"२ इति,
"ब्रह्माध्यायसहस्राणां शतं चक्रे स्वबुद्धिजम्।
तच्छङ्करेण शक्रेण गुरुणा भार्गवेण च ॥
संक्षिप्तं मनुना चैव बहुभिश्च तपोधनैः।" इति च।

ननु वैशालाक्षादीनि प्राचीनान्यर्थशास्त्राणि भारतादन्यत्र शिष्टकृतनिबन्धेषु

---

१। कामन्दकीयनीतिसार, १।१८

२। महाभारत, शान्तिपर्व, ५८।१-३

नोपलभ्यन्ते। एवं सति तानि शास्त्राणि कौटिल्येन दृष्टानीत्यत्र किं विनिगमकं चेदुच्यते। आधुनिकेषु शिष्टपरिगृहीतनिबन्धेषु प्राचीनार्थशास्त्रवचनानामनुपलब्धावपि भगवत्पूज्यपादश्रीशंकराचार्यानन्तरभाविश्रीसुरेश्वराचार्यापरपर्यायविश्वरूपाचार्यैः स्वकृतायां टीकायां बालक्रीड़ायां वैशालाक्षबार्हस्पत्यौशनसशास्त्राणां वचनान्युद्धृतानि समुपलभ्यन्ते।

राज्ञाऽन्यायेन यो दण्डो गृहीतो वरुणाय तम्।
निवेद्य दद्याद् विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतम् ॥१

तद् यथा बृहस्पतिः—स्वधर्मविदनुरक्तः शुचिरनुद्धत उद्युक्तो देशकालविन्नीतिनिगमेतिहासकुशलो व्यसनेमृदुरर्थशास्त्रकृतयोग्यो हस्त्यश्वपुरुषाचाराहोरात्रयामनिर्गमविनिश्चितमतिश्च स्वपरबलाबलज्ञो बलाधिकृतः सेनापतिः स्यात्। कुलाढ्य उद्युक्तो मृदुरुदात्त समरचित्तः शूरोऽनुरक्तोऽभेद्यः पत्तिविशेषज्ञ इङ्गिताकारकुशलः प्रतीहारः स्यात्। बल-कुल-काल-जातिसात्म्यगुण-वयः-शीलायुरादानगमनकल्पनावान् व्यपगतभयो विजयोर्जितमना हस्त्यध्यक्षः स्यात्। क्षेत्रजातिसात्मगुण-लक्षण-वाहनास्त्रज्ञोऽनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालज्ञो दर्शनीयो नीतिगतिज्ञो प्राज्ञो वाग्मी दूतः स्यात्। उभयत उत्तमवंशप्रभवः शुद्धो मनुबृहस्पत्युशनःशास्त्रविद् दण्डनीत्यादिकुशलोऽशठोऽजिह्मः सम्मानासम्मानाविकृतो विगतभीः कार्याकार्यविनिश्चितमतिरहार्यः सर्वोपधाशुद्धो गूढ़मन्त्रो मन्त्री स्यात्। अविकार्यो विकलेन्द्रियः प्रतापवान् सुभगः सुमुखो कृपणः प्रमादी दक्षो दाक्षिण्यचारित्ररक्षणार्थमधिकरणसन्दिग्धविवेककृदुपरिकः स्यादिति।

तथा च बृहस्पतिः "ब्रह्मशङ्खस्तुतिपुण्याहशब्दैर्विबुध्योत्थाय सन्ध्यामुपस्थाय देवपितृब्राह्मणान् मनसा वा नमस्कृत्य धर्मार्थकामोपधाशुद्धावंचकगृहीतावुपधायायातयामविश्वासोत्पन्नासन्ना परिकृतः" इति।

एवं च विशालाक्षः—

वन्यान् वनगतैर्नित्यं मण्डलस्थास्तथाविधैः।
चौरैरालोच्य सत्कुर्याज्जिहीषुर्दूरदीर्घदृक् ॥ इति।

तत्पूर्वभाविनः कौटिल्यस्य समये वैशालाक्षाद्यर्थशास्त्राण्यासन्नित्यत्र नास्ति विप्रतिपत्तिः।

---

१। याज्ञवल्क्यसंहिता, २।७०१

पूर्वग्रन्थानामतिविस्तृतत्वात् ततः संक्षिप्यार्थशास्त्रं प्रणीतं कौटिल्यपादैः । तदुक्तम्—

प्रजानामायुषो ह्रासं विज्ञाय च महात्मना ।
संक्षिप्तं विष्णुगुप्तेन नृपाणामर्थसिद्धये ।।[१]

विष्णुगुप्तः कोटिल्यस्यैवापरं नाम । एतत्तु प्रागेव प्रदर्शितम् । एतत्पूर्वतन-ग्रन्थानां विस्तार एवं निर्दिष्टः । तद् यथा—ब्राह्मं लक्षाध्यायात्मकम् । वैशालाक्षं दशसहस्राध्यायात्मकम् । ऐन्द्रं पञ्चसहस्राध्यायात्मकम् । बार्हस्पत्यं त्रिसहस्राध्यायात्मकम् । औशनसं सहस्राध्यायात्मकमिति । इदं तु षट्श्लोक-सहस्रात्मकम् । वक्ष्यति—

"शास्त्रसमुद्देशः पञ्चदशाधिकरणानि साशीतिप्रकरणानि सपञ्चाशदध्याय-शतं षट्श्लोकसहस्राणि" इति ।

अथवा स्तोकं स्तोकं परित्यजेति जयमंगलायाम् । तेन नास्य ग्रन्थस्य पदार्थत्वम् ।

अत्र तु "पृथिव्या लाभे"[२] इत्यादौ "संहृत्य" इत्यस्य स्थले "संगृह्य" इति पाठान्तरमस्ति । एतन्मते कानिचन विशिष्टस्थलानि परित्यज्य (यथा नेति-कौटिल्य इत्यादौ) अन्यः सर्वोऽप्यंशः पूर्वाचार्यसंगृहीतो वोध्यः । आधिक्येन त्वत्र प्राचीनार्थशास्त्रस्य ग्रहणम् । क्वचित्तु स्वनिर्मितान्यग्रन्थसंग्रहणं कृतम् । तद् यथा शुल्वधातु[३]शास्त्रमित्यादौ धातुशास्त्रपदेन स्वनिर्मितं धातुकौटिल्यमित्यस्य । एतच्छास्त्राध्ययने तु नास्तीतरार्थशास्त्राध्ययनापेक्षा । तदुक्तं जयमंगलायाम्—"अनपेक्षितसहायान्तरम्" इति । "इदमर्थशास्त्रम्" इत्यत्र इदंशब्देन बुद्धिस्थं वोध्यम् । अथवायमुद्देशग्रन्थः निर्देशग्रन्थानन्तरं निर्मितः स्यादिति यदि स्वीक्रियते तर्हि सम्पूर्णो निर्देशग्रन्थात्मिकार्थशास्त्रपर इदं-शब्देन वोद्धव्यः । अर्थशास्त्रमित्यत्र हि पुनरप्यर्थग्रहणं स्वमते तस्य प्राधान्यप्रदर्शनार्थम् । तेन क्वचिद् धर्मनिरूपण-मर्थार्थमिति वोध्यम् ।

इदमर्थशास्त्रं प्राचीनं वा सर्वमपि प्राधान्येन नीतिशास्त्रमित्युच्यते । तदुक्तं कामन्दकीयैः—

---

१। अर्थशास्त्र,
२। अर्थशास्त्र, १।१ द्रष्टव्यम् ३। अर्थशास्त्र, २।१२

"नीतिशास्त्रामृतं श्रीमानर्थशास्त्रमहोदधेः ।
समुद्दध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे ।।"१ इति ।

तस्य स्पष्टीकरणाय नीतिशास्त्रस्वरूपमुच्यते । तत्रोपाध्यायनिरपेक्षायां— "प्रत्यक्षपरोक्षानुमानलक्षणप्रमाणत्रयनिर्णीतायां फलसिद्धौ देशकालानुकूल्ये सति यथासाध्यमुपायसाधनविनियोगलक्षणा क्रिया नीतिः" इति ।

जयमंगलायां तु प्रत्यक्षानुमानागमप्रमाणदेशकालशक्तिपुरःसरार्थसाधन-विनियोगलक्षणा क्रिया नीतिः" इति ।

उभयमतसाधारण्येन प्रमाणत्रयनिर्णीतेष्वसाधनताककर्मानुष्ठानं नीतिरिति तदर्थः । अत्र प्रमाणत्रयस्य सार्थक्यं नीतिलक्षणे वक्तव्यमस्ति । तत्राभ्यर्हितत्वाच्छब्दप्रमाणस्य नीतावुपयोगित्वं प्रस्तूयते । प्रत्यक्षानुमानाभ्यां निर्णीतमपीष्टसाधनत्वं कालान्तरे तत् तथैव स्यात् कञ्चन दुरपनेयं दोषं वा नोत्पादयेत् । अथवान्यथासिद्धत्वं नास्तीति सर्वज्ञबुद्धिमन्तारा कस्य बुद्धिर्निर्णेतुं समर्था भवेत् । आधुनिकेऽपि समये दन्तवैद्यो दन्तानां सूक्ष्मातिसूक्ष्मं भेदादिविषयं चिन्तयन्नन्यच्चिन्तयितुमवसरं न लभते न वा दन्तचिकित्सायामितरावयवानां दुष्टत्वं न सम्भविष्यतीति वक्तुं प्रतिभूत्वं स्वीकुर्यात् । तथैवानुष्ठानात्मकनीतौ दीर्घकालानन्तरं समाजस्य कीदृशी स्थितिर्भविष्यतीति किं कदा भविष्यतीति कस्य कीदृशः परिणामः कति विरुद्धसंयागा हानिवश इदं लघु इदं गुरु इदं तत्त्वमिदं नेति निर्णयः केन कर्त्तव्यः । सम्भवति च प्रत्यक्षानुमानाभ्यां कृतो निर्णय ईशसमवेतेन ज्ञानेन विसम्वादी तदा तत्र पूर्वोक्तयुक्त्या ईशज्ञानावृत्तिविषयताशून्यत्वरूपं प्रमात्वं न भवेत् । सत्येवं ज्ञानप्रभा सत्त्वकिपरिणामनी नोपलभतः । पुरुषबुद्धिप्रसूतानामप्रामाण्यदर्शनेन सन्दिग्धं दोषबहुलं च स्यात् । परमेश्वरे यमर्थमुपदिशति तत्र कार्यकरत्वस्य नैयत्यादानन्दप्रभामिश्रितत्त्वं नियतमिति प्रागुक्तम् । अतस्तस्य तत्प्रयुक्तस्य राज्यबीजभूतस्य सत्त्वस्य शब्दप्रमाणस्य नीतिलक्षणे घटकत्वमुक्तम् ।

अथ नीतिलक्षणे प्रत्यक्षानुमानोभयोपयोगित्वमुच्यते । विषयोऽयं रस-प्रतीतौ प्रतिबन्धकानां विघ्नानां विचारे सति स्फुटः स्यात् । तत्र ये विघ्नास्त एव नीत्यनुष्ठाने तदधिकारिणां पुरतः सम्भवन्ति । तन्निवारणोपायाश्चोभय-

---

१ । कामन्दकीयनीतिसार, १।६ पाठभेदः—य उद्दध्रे for समुद्दध्रे

त्रापि समाना इति प्रत्यक्षानुमानयोरुपयोगित्वप्रदर्शनार्थं रसप्रतीतौ प्रतिवन्धकभूता ये विघ्नास्तन्निवारणोपायाश्चाभिधीयन्ते। तथा हि—"विघ्नाश्चास्यां प्रतिपत्तौ अयोग्यतासम्भावनाविरहो नाम स्वगतत्वपरगतत्वनियमेन देशकालविशेषावेशो: निजसुखादिविवशीभाव: प्रत्युपायवैकल्यं स्फुटत्वाभाव: अप्रधानता संशययोगस्च" इति सप्तविघ्ना: साहित्यशास्त्रे उपवर्णिता अभिनवभारत्याम्।[१]

देशकालविशेषावेशेऽमुकं कर्म अमुकेनामुकसमये कृतमित्येतत्स्वरूपे ज्ञाते तेन मम किं प्रयोजनमिति ज्ञात्वा तच्चरित्रदर्शनात् सामाजिक औदासीन्यं भजते तन्निरासाय नाटके विधिभागचरित्राभिनयेन ज्ञापयितव्यो भवति तेनास्माभिरप्यनुष्ठातव्यमिति जानान: सामाजिको नौदासीन्यं तत: स्वीकरोति। सर्वसाधारण्येन समयनिर्देशान्निजसुखादिविवशीभाव: साधारणीकरणव्यापारात् परिमितप्रमातृता रसम्य प्राधान्यादप्रधानता, अनुभावादीनां यथावदभिनयादभिव्यज्यमानविषये सन्दिग्धता चेति दोषा अपसार्यन्ते।

प्रतिपत्त्ययोग्यतासम्भावनाविरहयोर्निराकरणाय ऐतिहासिकं लौकिकं प्रसिद्धं च नेतृचरितं नाटकेऽभिनीयन्ते। अन्यथाभिनीतं तच्चरित्रमलौकिकत्वादसम्भावितं मन्येरन् नाटकदर्शिन:। तथा विपरीतं चेत् तच्चरित्रं बाधितमिति विरसीभवेयु: सामाजिका:। अत: प्रत्यक्षानुमानाभ्यामभिनीतस्य चरितस्यालौकिकत्वं दूरीक्रियते। अर्थादसम्भावनापसरति। इतिहासप्रसिद्धत्वे विपरीतत्वं नाशङ्क्यते प्रतिपत्त्ययोग्यतानिरासाय सम्भावनाविरहस्य निरासाय प्रत्याक्षानुमानाभ्यां निर्णीतं लौकिकं तथेतिहासप्रसिद्धं चरित्रमभिनीयते। नीतिशास्त्रेणापि यद्विधीयते परिपालनोपायानुष्ठानार्थं तत्रासम्भावितत्वं चाशंकितं स्यात् तन्निरासाय प्रत्यक्षानुमानाभ्यां नीतिविहितेऽर्थे लौकिकत्वं तथा पूर्वराजचरितत्वादबाधितत्वं ज्ञाप्यत इति। तर्कसचिवस्येतिहासस्य प्रामाण्यं भवति।

यद्यपि नीतिशास्त्रात्मकमर्थशास्त्रं पृथिव्या लाभपालनार्थकमस्तीति प्राङ्निर्णीतं लाभपालने च राजधर्मस्तथा च निष्प्रयोजनत्वादितरैर्नाध्येयमित्यापाततो भाति, तथापि यस्मिन् समये राजा नीतिशास्त्रं पर्यालोचयन् सर्वान् पालयति तदेतरे नीतिशास्त्रं मा चिन्तयन्तु। यदा तु तथाविधो राजा नास्ति तदेतरै: पालनधर्मो

---

१। अभिनवभारती, नाट्यशास्त्र, पृ. २८०

नोपेक्ष्यो न वा तद्विधायकं नीतिशास्त्रं पालनधर्मस्य मुख्यत्वात्। तदुक्तं—"क्षात्रधर्मो ह्यादिदेवात् प्रवृत्तः पश्चादन्ये शेषधर्माः प्रवृत्ताः" इति।

तथा—आन्वीक्षिकीत्रयीवार्ताः सतीर्विद्याः प्रचक्षते।
सत्योऽपि हि न सत्यस्ता दण्डनीतेस्तु विप्लवे॥
दण्डनीतिर्यदा सम्यङ् नेतारमधितिष्ठति।
तदा विद्याविदः शेषा विद्याः सम्यगुपासते।[1] इति

वीरमित्रोदये व्यवहारप्रकाशेऽपि—"न चैवं प्रजापालनविधेरभिषिक्तक्षत्रियाधिकारिकत्वादन्येषां तत्र फलाभावेनाप्रवृत्तिः। दृष्टद्रव्यादिलाभार्थं कथञ्चित् प्रवृत्तावपि तस्मात् धर्माभावप्रसंगोऽन्यथा दर्शनादर्शनन्यायप्रवृत्त्यादिना प्रभावोत्पत्तिश्चेति वक्तव्यम्। यतो दयाहिंसादिसाधारणधर्मान्तर्भावेन प्रजापालतस्य तेषामपि धर्मंजनकत्वात् नृपपदेन तत्संग्रहसम्भवाच्च"[2] इति।

अथ स्वग्रन्थस्य प्रकरणाधिकरणसमुद्देशोऽपि महाभागैः कौटिल्यैः सुष्ठु कृतो दृश्यते। प्रकरणत्वं तु तत्तत्फललाभाय तत्सामग्रीविषयिणी या जिज्ञासा तत्विषयतात्पर्याप्त्यधिकरणत्वं यावत्स्वर्थेषु तावतामर्थानामभिधायकवाक्यकूटत्वम्। तत्समुदायोऽधिकरणम्। समुद्देशस्तावत् संक्षेपेण कीर्तनम्।

अत्र पुनः समस्तस्य संक्षेपेण सूत्रमुखेन विवेचनं पौनरुक्त्याय भवतीति न मन्तव्यम्। ध्येयं विषयं योऽधिगन्तुमिच्छति कुत्र वर्णितो वर्तते इत्यनेनोद्देशग्रन्थेन ज्ञात्वा तावद्विषयस्तेन सारल्येन ज्ञातः स्यादिति प्रयोजनसत्त्वान्न पौनरुक्त्यम्। विद्यासमुद्देश इत्यारभ्य तन्त्रयुक्तय इत्यन्तं हि समुद्देशं कृतवन्तः कौटिल्यपादाः। अत्र ग्रन्थे तावदशीत्यधिकं शतं प्रकरणानि तथा पञ्चदश चाधिकरणानि। एतत् तु प्रागेव प्रदर्शितम्।

१। कामन्दकीयनीतिसार, २।८-९
२। मित्रमिश्र, वीरमित्रोदय, व्यवहारप्रकाश,

# सप्तमोऽध्यायः

## अर्थशास्त्रस्वरूपम्

उद्देशनिर्देशात्मकमर्थशास्त्रग्रन्थं चाणक्यः सर्वस्यार्थशास्त्रस्य पारं विजानानः संक्षेपेण षट्श्लोकसहस्रेण जगाद। तस्य तु टीका जयमङ्गलात्मिका सर्वाण्यपि पूर्वाण्यर्थशास्त्रव्याख्यानान्याकलय्य संक्षेपतो रचिता। अस्य टीकाकारस्य समस्तार्थशास्त्रटीकाभिज्ञत्वं मूलकृतः सर्वार्थशास्त्राभिज्ञत्वमिव विशदीभवति।

यस्मात् कौटिल्यो ग्रन्थारम्भे शुक्रबृहस्पती नमस्करोति तस्मादयमपि टीकाकारो ग्रन्थादौ तयोः पूज्यत्वं प्रतिपादयति।

ननु केषुचिद् ग्रन्थेष्वारम्भे पूज्या नमस्क्रियन्ते स्मर्यन्ते कीर्त्यन्ते वा; केषुचिद् ग्रन्थेषु न ते नमस्क्रियन्ते स्मर्यन्ते कीर्त्यन्ते वेति नमस्काररूपमंगलस्य दृष्टसाधारणतया प्रयोजनवत्त्वं कथं मन्तव्यमिति चेत्—प्रतिभासम्पत्तिरुक्त-मंगलस्यासाधारणफलमिति। तथा हि प्रतिभासम्पत्तिरहितोऽधीतशास्त्रोऽपि कस्मिन्नपि पदे अधिष्ठातुमयोग्यो भवति। यदाह—नेति वाहुदन्तीपुत्रः

शास्त्रविददृष्टकर्मा कर्मसु विषादं गच्छेत्।[1]

अभिजनप्रज्ञाशौचशौर्यादियुक्तान् कुर्वीतेति। एतद्विषये कौटिल्योऽपि सर्वमुप-पन्नमिति ग्रन्थेन स्वसम्पत्तिं सूचयति। अतः समस्तशास्त्रेष्वधीतेष्वपि विद्यावतां प्रतिभासम्पत्तेरपेक्षा वर्त्तते एव। सेयं गुर्वादीनां पूज्यानां प्रसादाधीनेति तत्र तत्रोक्तम्। तद् यथा—

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनाम्॥
अधिगच्छति शास्त्रार्थं स्मरति श्रद्दधाति च।
यत्कृपालेशमात्रेण नमोऽस्तु गुरवे सदा॥ इति

"तं गुरुशिष्यसब्रह्मचारिशिष्टश्रेयोऽर्थिभिरणसूयुभिरभ्युपेयात्" इति।

---

१ अर्थशास्त्र, १।८

पं स १५८ ]

अत्रैव पूज्यैः सह विनम्रीभूय संगतिर्वादश्च प्रतिभास्फूर्तये कारणं भवतीति न्यायसूत्रव्याख्याने वाचस्पतिमिश्राः। तथा हि—"सब्रह्मचारी सहाध्यायी। गुरु-शिष्यसहाध्यायिभ्योऽन्याः शास्त्रेणानुशिष्टाः शिष्टश्रेयोऽर्थिनः श्रेयसि मोक्षोपलक्षणे श्रद्धाः। तेषामपवर्गश्रद्धादर्शनादस्ति तदुपायोऽभ्यासः प्राग्भवीय इत्यनुमीयते। तेन तेषामपि प्राग्भवीयसंस्कारवशात् प्रतिभोपासनीयेति। अभ्युपेयादभिमुखमुपेत्य जानीयाद् गुर्वादिभिः सहेत्यर्थः"[१] इति।

साहित्यविदोऽपि इमां प्रतिभां शक्तिपदेन व्यवहरन्ति। तत्स्वरूपं गोकुलनाथोपाध्यायैरेवमुक्तम्—

मनसि सदा सुसमाधिनि विस्फुरणमनेकधाभिधेयस्य।
अक्लिष्टानि च पदानि विभान्ति यस्यामसौ शक्तिः॥ इति।

यदि पूज्याः कञ्चनोपेक्षन्ते शपन्ति वा तर्हि सत्यवसरे प्रतिभोद्वोधकसंस्काराणामुद्बोधो न भवति। अत्र युद्धसमये कर्मादीनां प्रसंगविशेषे शस्त्रास्त्रं प्रति विस्मरणमुदाहरणं पर्याप्तम्।

पूज्यानामपूजने कारणं गर्वेण मदेन वा विकृतं मनो भवति इति भावप्रकाशने उक्तम्। तद् यथा—

गर्वो विद्याबलैश्वर्यवयोरूपधनादिभिः।
तमनुत्तरदानेन शून्यालोकैरभाषणैः॥
आश्रितेष्वप्यवज्ञानाद् द्दोर्द्धयाङ्गावलोकनात्।
असूयामर्षपारुष्यापहासगुरुलङ्घनैः।
अकारणादधिक्षेपाद् गात्राणां विकृतैर्वदेत्॥
प्रतिक्रियेच्छामर्षः स्याद् विद्यैश्वर्यबलाधिकैः।
आक्षिप्तस्य सभामध्येऽवमानं गमितस्य वा॥[२]

इति।

एवं स्थिते राज्यसञ्चालने प्रतिक्षणं विलक्षणानि कार्याण्युपस्थितानि भवन्ति। तत्रानेकविधाः प्रयोगा अप्यभ्यूहा भवन्ति राजनीतिविद्भिः। अतस्तेषु सदा समाधिस्थितौ स्थित्वा प्रतिभाख्यशक्तिसंस्काराणामुद्वोधापेक्षा वर्त्तते। परन्तु

१ वाचस्पतिमिश्र, ४।२।५१
२ भावप्रकाशन, १।पृः २२, ६-१२

इमे पूज्यान् न नमन्ति न स्तुवन्ति न कीर्त्तयन्ति वा गर्वमदहेतुक्या रजस्तमः-सहचारिण्या मनोविकृत्या पूर्वोक्तरीत्या प्रतिभोद्‌बोधकसंस्काराणामनुद्बोधो निश्चितम् ।

तथा च सकलजनमनोरञ्जकस्य कवित्वबीजस्य प्राणभूतं यदौचित्यं तदेव गर्वमदाभ्यामुपहन्यते । ततो विवेकस्थाने जाड्यमापद्येत । तेन स्वातन्त्र्य-विरोधिपारतन्त्र्यमवश्यंभावि । स्पष्टं चैतद् भावप्रकाशने ।

जाड्यमप्रतिपत्तिः स्यात् सर्वकार्येषु सर्वदा ।
इष्टानिष्टान्न जानाति सुखदुःखे न वेत्ति च ।।
प्रश्ने न किञ्चित् प्रब्रूते न शृणोति न पश्यति ।
हाहेति भाषणाकाण्डहुङ्कारः शिथिलाङ्गता ।।
कार्श्यवैवर्ण्यनिश्वासाः स्तम्भः स्पर्शानभिज्ञता ।
एते जाड्यभवा भावा मीनकेतनमाश्रिताः ।।[१] इति ।

गुरुपरम्पराप्राप्तस्यास्मच्छात्रस्यायं विशेषो यत् पूज्यभक्तिपूर्वकं शास्त्रमधीयेत तर्हि शास्त्रार्थः स्वयमुपस्थितो भवतीति । यदि गुरुभक्तेराश्रयणं न क्रियते तर्हि तन्मूलकनिर्विकारताया अभावेन मनो विक्षिप्तं मूढ़ं वा भवेत् । तेन मस्तिष्क-सम्बन्धेषु ज्ञानतन्तुषु कार्यकरणक्षमत्वं प्रतिभाया अभावो वा निश्चितः । तथा सति स्वातन्त्र्यमसत्प्रायमेवेति प्राय उक्तमेव । मनसः सविकारतायां ज्ञानतन्तुष्व-शक्तिः कथं भवतीति चिकित्साशास्त्रे स्पष्टम् ।

तथा च आयुर्वेदशास्त्रे उच्यते वैद्युतिकी शक्तिः काचित् मस्तिष्कादारभ्य सम्पूर्णे शरीराभ्यन्तरे चक्रवत् प्रचलति । एतेनैव सञ्चालनेन संवेदनं चैतन्यं च जायते । इदं तु चैतन्यं मनुष्याणामिच्छानुसारतो न जायते किन्तु मनुष्याणामभिलषितैः सहास्याः शक्तेः कोऽपि सम्बन्धो नास्ति । औदरिकी पीड़ा मनसोऽधीरता च स्नायविकशान्तिनिर्भरा नात्र विमतिः काचित् । यद्युदरेण सह मस्तिष्कस्य स्नायुसंयोगो विच्छिन्नो जायते तदा पाचनक्रिया रुद्धा भवेत् । पुनः संयुक्ते सति चलति । यथा विद्युदावेगेन सह 'ब्याटारि'इत्यस्य संयोगे वैद्युतिककार्याणि पुनः सम्पद्यन्ते तद्वत् ।

---

१ भावप्रकाशन, ४।पृ: ८१, १-६

रुधिरवाहिनी नाड़ी शरीराभ्यन्तरे सर्वत्र शिराद्वारा प्रवहति। यथायथैव शोणितप्रवाहभारो वर्धते तथा तथैवास्यागतिर्वृद्धिमुपगच्छति। किन्त्वतिद्रुतभारो महतेऽनिष्ठाय कल्पतेऽतिलघुभारेणापि शरीरहानिरुपपद्यते। इदं शोणितधाराणां नक्तन्दिवं परिचङ्क्रमणं स्नायविकशक्त्यैव सम्भवति। द्रुतगमनं धीरगतिर्वा मन्दस्पन्दनमुताहो गभीरध्वननं स्नायुसञ्चालनादुपजायते। अयं तु प्राकृतिको नियमः। इयं स्नायविकी शक्तिर्यावत् पर्यन्तं यथायथं वर्तते—नातिभाराक्रान्ता-नातिलम्वी-नातिरुष्टा-नातिपुष्टा वा—यावत्कालपर्यन्तं स्वाभाविकी अस्या अवस्था तावत्कालपर्यन्तं शरीरयन्त्रस्य सलीलं गमनमवैकल्यं च। विपर्यस्तायां स्नायविक्यां शक्त्यां देहस्य ग्लानिः, इन्द्रियाणां वैकल्यं दुरारोग्यरोगस्य प्रादुर्भावस्तथाकालमृत्युः। अनायासेनास्मिन् विषये ज्ञानं न जायते इति सर्वेषामभिमतम्। किन्तु विषयस्य ज्ञानेऽभिगते सति विचारवतां प्राणिनां कश्चन धर्मो वर्त्तते। स नित्यं तस्य स्नायविकमण्डलेषु दृष्टिं दद्यात् यथेमानि स्नायुमण्डलानि रोगमुक्तानि स्युः। न केवलमयमेषां धर्मः, परन्तु शरीररक्षणाय कर्त्तव्यमपि। शरीरं यथा सुस्थं स्वावलम्वि भवेत् तथा सर्वा एव व्यवस्था अवलम्वनीयानुसर्त्तव्या च। स्नायुमण्डलमाध्यमेनैव शारीरिकाणां मानसिकानाञ्च शक्तीनां वृद्धिः पुष्टिश्च। वस्तुतस्तु न केवलं शारीरिकशक्तिभिः शरीररक्षणं सुसम्पन्नं जायते। शरीरमाद्यं खलु धर्मसाधनमिति यः प्रायोवादस्तत्र शरीरपदेन मानसशरीरमपि ग्राह्यम्। मानसिकी शक्तिरपि यथायथं रक्षणीया, शरीरापेक्षया मानसमूल्यं नाकिञ्चित्करम्। शरीरेण सह मनसो नैकट्यं सुविदितमेव। अनयोः सम्वन्धोऽतिगभीरः खलु। इदं तु ज्ञेयं शरीरं तथा मनश्च स्नायुमण्डलद्वारा एव नैकट्यं नीतम्। शारीरिकमावेदनं यत्किञ्चन स्नायुभिरेव हृदये नीयते। मनसोऽपि स्पन्दनं स्नायुः हृदयं नयति। मादकपदार्था उत्तेजकपदार्थाश्च भृशं हानिकारकाः स्नायूनामुपरि अनयोः प्रभावश्च भूयान्, अत इमौ सर्वदैव परिहर्त्तव्यौ।

चा-कफि-अहिफेन-सुराश्च स्नायूनां क्षतिकारकाः। इमे समग्रां स्नायुपद्धतिं विनाशयन्ति। ताम्वुलानि यद्यप्यापातरम्याणि, तथापीमानि परिहर्त्तव्यानि। ताम्रकूटमपि भृशं दुःखावहम्। तस्मात् ताम्रकूटसेवनात् नानाविधा दुसाध्याश्चिरस्थायिनो रोगाः प्रजायन्ते। किन्तु ये एषु विषयेष्वासक्तास्ते

एषां क्षतिमुपलब्धुं न शक्नुवन्ति। एषां पदार्थानां सेवनादनन्तरं काचन अनिर्वचनीया प्रसन्नता महान् हर्षश्चैतेषां मनस्युत्पाद्यन्ते। अकस्मात् ते ईदृशात् सुखसाधनात् न विरमन्ति। किन्त्विमे हानिकराः -पदार्थाः शतसहस्रसंख्यकानां नरनारीणां भृशमनिष्टं साधयन्तस्तान् शारीरिकाक्षमान् कर्त्तुमीहन्ते। वहुसहस्रपुरुपास्ताम्रकूटसेवनप्रभावात् पुंस्त्वम् विसर्ज्य क्लीवा भवन्ति। तेषां वुद्धिश्च स्मृतिश्च विनाशमुपगता। अन्ततो गत्वा ते दीर्घोन्माद-रोगाक्रान्ताः सर्वेषां कृपापात्रमेव भवन्ति।

अत एव यदि कश्चन स्नायुमण्डलं नीरोगं कृत्वा संसारमार्गे परिभ्रमितु-मिच्छति, यदि स शारीरिकमानसिकस्वास्थ्यमक्षुण्णं चिकीर्षति तर्हि सोऽवश्यमेव प्रकृतेराज्ञां पालयतु। केवलं प्रकृतेरादेशपालनेनैवालम्, परन्तु प्रकृतेराज्ञायाः विपरीतं किञ्चन कर्म नानुष्ठातव्यम्। प्राकृतिकशक्तेर्या विपरीता शक्तिः सा हेया। यथा प्रकृतेः शक्तेरनुगामी भवितव्यं न तद् वैपरीत्यमाचर्यं तथा गुरूणां हितैषिणाञ्चादेशा अभिनन्द्य परिपालनीयाः। शाकुन्तलेऽपि कण्वोपदेशः स्मरणीयः—"भर्त्तुर्विप्रकृताऽपि रोषणतया मास्म प्रतीपं गमः"[१] इति।

आयुर्वेदग्रन्थे उन्मादरोगस्य वहवो हेतव उपनिवद्धा वर्त्तन्ते। तस्मात् कारणकलापादिमान्येव प्रसिद्धानि—

(क) संयोगविरुद्धभोजनम्

(ख) विषसंयुक्तपदार्थभोजनम्, विषसंयुक्तपदार्थपानञ्च

(ग) अपवित्रभोजनम्, आमान्नभोजनम्

(घ) देवतानां गुरूणाञ्च अवमाननम्

(ङ) अत्यन्तामोदः अकल्पनीयभयञ्च

(च) वलवता सह विरोधः (अहो! दुरन्ता वलवद्विरोधिता।)[२] अस्मात् कारणाद् वातपित्तकफाः कुपिता भवन्ति, वर्धिताश्च जायन्ते। वृद्धिं गता इमे अल्पसत्त्वानां क्षीणशक्तीनाञ्च प्राणिनां वुद्धिं विनाशयन्तो मानसं हृदयञ्चाच्छादयन्ति। तदनन्तरं मनोवाहिनी नाड़िका क्षीणत्वमुपयाति, अन्तःकरणस्य मोहमुत्पादयति च।

---

१ अभिज्ञानशकुन्तलम्, ४।१८    २ किरातार्जुनीयम् १।२६

अपस्माररोगस्य१ निदानसम्प्राप्तिविषये चरकेन लिखितं यस्य हृदि रजोगुणाधिक्यं तमोगुणाधिक्यं वा वर्त्तते तस्यैवोद्भ्रान्तिरशान्तिश्च। यो नाम

१। चिकित्साचन्द्रोदय, पृः ३९६

"मस्तिष्क की वरकी या विजली की ताकत से शरीर चक्कर खाने या चारों तरफ संचार करने में से संवेदना—चेतना और इच्छानुसार गति ये ही काम नही होते, वल्कि वे सव भी काम होतें है जिन से हमारी इच्छा का कोई सम्वन्ध नहीं है। पेटका हाजमा और दिल की थड़ कन ये दोनों काम भी स्नायविक शान्ति से होते है। आप पेट से तअल्लुक रखने वाली स्नायु को काट दीजिये, हाजमा या पाचनक्रिया वन्द हो जायगी, विजली की वेटरी लगा दीजिये फिर पाचन कार्य या हाजमा होने लगेगा।

दिल और रक्तवाहक नाड़ियों में हो-कर खून सारे शरीर में चक्कर लगाया करता है। खून का यह दौरा भी स्नायविक शक्ति के प्रवाहों की खींचने और दूर करने वाली शक्तियों के वल से होत रहता है। निश्चय ही खून का दौरा जारी रखने वाली शक्तियों के यही शक्ति है। नेचर ने रक्त संचालन या खून के दौरे करने के लिये जो कलपुरजे वनाये है, वे सभी स्नायविक शक्ति से चलतें है। मसलन्, लकवा या कलिज मारे हुए अङ्गों में पैदा हुए जखम या घाव शरीर के और भागों की अपेक्षा वहुत देर में ओर वड़ी मुश्किल से आराम होते है। स्नायविक शक्ति के विना ठीक रह जिन्दगी का कोई भी काम अच्छी तरह से नहीं चल सकता।"

इस विषय का ज्ञान होने पर प्रत्येक विचारवान् का धर्म और कर्तव्य है कि वह अपने स्नायविकमण्डल को सदा निरोग और दुरुस्त रखें। इस सिष्टम के निरोग रखने के लिये उन तमाम आदतओं से किनारा कर लेना चाहिये। जो शारीरिक और मानसिक शक्तियों के वल को क्षीण करती है। केवल शारीरिक शक्तियों की रक्षा से ही काम नहीं चल सकता. मानसिक शक्तियों को रक्षा से की—उस से कम जरूरत नहीं है। क्यों कि शरीर और मन का बड़ा गहरा सम्वन्ध है। शरीर और मन के दर्म्यान हमदर्दी या संवेदनात्मक का सम्वन्ध स्नायुमण्डल से स्थापित कर रखा है। अतः मादक और उत्तेजक पदार्थों का हानिकारक असर स्नायुओं पर अवश्य होता है।

काफी चाय अफीम और शराव से स्नायुमण्डल या नरवस सिष्टम को वड़ी हानि पहुंचती है। तमाखू को लोग मामूली चीज समझते है पर वह भी इन से कम हानिकारक नही है। उस से भी अनेक दुस्साध्य और चिरस्थायी रोग पैदा होते है। इन चीजों के चाहने वाले इन के बुरे नतीजों को नहीं समझते। इन पदार्थों के सेवन से एक प्रकार की प्रसन्नता और जिन्दादिली पैदा होती है। वही इन के चाहनेवालों को अन्धकार देती है। उसी के वजह से वे इन वुरे नतीजों का खयाल तक नहीं करते।

विपरीतमाहारं भुङ्क्ते, अशुद्धमपवित्रञ्च भोजनं परिगृह्णाति स शास्त्रविरुद्धं कार्यं कुर्वन्नात्मनः शरीरं नाशयति। तस्य वातपित्तकफा भृशं रजोगुणाच्छन्ना-स्तमोगुणाच्छन्ना वा स्नायुमण्डलीं ध्वंसमार्गं नयन्ति। स प्राणी क्रमशः क्रोध-मोहलोभादिभिर्वशीभूत सन्नचिरेणैव शोकक्रोधाधीनः स्मरणशक्तिमपहारयति।

---

इन चीजों ने करोड़ों स्त्रीपुरुषों को निकम्मा बना दिया। लाखों पुरुष पुंस्त्व खोकर क्लीव हो गये। लाखों की बुद्धि और स्मरणशक्ति नाश हो गयी। होते होते अन्त में वे उन्माद रोग के शिकार हो गये।

भाईयों यदि आप स्नायु मण्डल को निरोग रख कर संसार भर के रोगों से बचना चाहते हो; तो कानून कुदरत को मानो। प्रकृती की आज्ञाओं का पालन करो, कानून कुदरत के खिलाफ कोई काम मत करो। उस की आज्ञाओं को मानना अपना प्रधान कर्तव्यधर्म समझो। ("इति तथा गुरूणामपमाने न रोगादयो भवन्तीति अपि तत्रोक्तम्।")

उन्माद के निदान या कारण। नीचे लिखे हुए कारणों से उन्माद रोग होता है :—(1) संयोग-विरुद्ध भोजन करने से। (2) विष या जहर मिले पदार्थ खाने से। पीने से। (3) अपवित्र या नापाक खाना खाने से। (4) देवता या गुरु वगैरः का अपमान करने से। (5) अत्यन्तखुश होने या अत्यन्त डरने से। (6) अपने से जबरदस्त के साथ वैर करने से।

उन्माद को सम्प्राप्ति :—ऊपर लिखे हुए कारणों से वात, पित्त और कफ कुपित होते या बढ़ते है। बढ़-कर ये अल्पसत्व या हीनशक्ति-कमजोर आदमियों के बुद्धि के रहने की जगह-मन और हृदय को खराब करतें है। इस के बाद ये मनोवाहि धमनी नाड़ियों में अपना दखल जमाकर, अन्तःकरण में विकार उत्पन्न करते या उसे मोहित करते है।

अपस्मार के निदान और सम्प्राप्ति :—"चरक" में लिखा है कि जिस का चित्त रजोगुण और तमोगुण से घिरा रहता है। जिस के दोष उद्भ्रान्त, विषम और अधिक होते हैं। जो भोजन के नियमों के विपरीत मैला, खराब और अपवित्र खाना खाता है, जो शास्त्र में लिखे हुए नियमों के विरुद्ध काम करता है। और जिस का शरीर अत्यन्त क्षीण हो जाता है, उस के वातादि दोष कुपित हो कर और रजोगुण-तमोगुण के अत्यन्त वशीभूत हो-कर अन्तरात्मा के निवास स्थान हृदय में डेरा डाल देते हैं। वही आदमी जब काम, क्रोध, मोह, लोभ आदि के वशीभूत होता यानी चिन्ता, शोक या क्रोध आदि करता है, तब हृदय में ठहरे हुए वे ही दोष उत्तेजित होकर स्मरणशक्ति को नाश कर देते है। इस अवस्था का नाम ही 'अपस्मार' या 'मृगी' है।

कोढ़ के निदान—कारण :—नीचे लिखे हुए कारणों से कोढ़ रोग होता है :—

कोढ़रोगस्य निदानं कारणञ्च चरकमेवमाह—(क) दुग्धमत्स्यादीनां परस्परविरुद्धपदार्थानां बहुभोजनम्, (ख) जलीयपदार्थस्य तथा गुरुपदार्थस्याधिकभोजनम् (ग) वमनवेगरोधः (घ) मलमूत्रादीनां वेगरोधः (ङ) बहुभोजनांदनन्तरमेव द्रुतगमनम् (च) अधिकभोजनादनन्तरमातपे अग्निसविधौ वा भ्रमणम् (छ) घर्माक्तकलेवरो द्रुतं शीतलजलावगाहनं तज्जलपानञ्च (ज) अजीर्णोऽपि पुनः पुनः खाद्यग्रहणम् (झ) भयभीतः शीतलजलावगाहनं (ञ) नवीनमन्नं दधि चाधिक्येन ग्रहणं तथा पक्वान्नमिष्टान्नतैलपदार्थानां बहुग्रहणम् (ट) दुग्धेन सह मिश्रितानां गुड़ानामधिकभोजनम् (ठ) दिवानिद्रा (ड) विदग्ध्याजीर्णावस्थायां मैथुनम् (ण) गुरुजनानां तथा ब्राह्मणानावमाननम्।

एतद्विषये आयुर्वेदीयप्रमाणं धर्मनिरूपणावसरे निरूपितमनुसन्धेयम्। स एव विकारो राजसताममसंज्ञया व्यवसीयते। अतस्तन्निरासाय हेतुभूतस्य सत्त्वात्मकस्य वैद्यशास्त्रादावुपवर्णितस्य धृतिभावस्य लाभाय शिष्याः पूज्यान् नमस्कुर्वन्ति, स्तुवन्ति, कीर्तयन्ति वा। इदं यद् दृष्टं फलं मङ्गलस्य तन्न गुरुभक्तिरहितेषूपलभ्यते।

उक्तं च ते दृष्टादृष्टार्थानुग्राहिणो देवाः। ननु देवत्वस्य दृष्टानुग्राहकत्वं

---

(1) दूध और मछली वगैरः परस्पर विरुद्ध भोजन करने से। (2) दही और दूध वगैरः परस्पर विरुद्ध पदार्थ खाने-पीने से। (3) पतले, चिकने और भारी पदार्थ जियादा खाने से। (4) आती हुइ वमन या कयका वेग रोकने से। (5) मल-मूत्र आदि के वेग रोकने से। (6) बहुत सा खाकर दण्ड-कसरत वगैरः करने से। (7) बहुत खाकर धूप या आग के सामने रहने से। (8) सर्दी, गर्मी, लङ्घन और आहार को अनुचित रीति से सेवन करने से। (9) पसीने में तत्काल नहाने आर शीतल जल पीन लेने से। (10) मिहनत कर के तत्काल नहाने और ठण्डा पानी पीने से। (11) भय-भीत होनेपर तत्काल नहाने और शीतल जल पीने से। (12) अजीर्ण में खाने या भोजनपर भोजन करने से। (13) वमन विरेचनादि पंचकर्म के विगड़ने से। (14) नया अन्न, दही, मछली ओर खारे, खट्ठे पदार्थ अधिक खाने से। (15) उडद, मूली, पक्वान्न, मिठाई और तिल जियादा खाने से। (16) दूध और गुड़ मिलाकर जियादा खाने से। (17) विदग्धादि अजीर्ण होने पर मैथुन करने से। (18) दिन में बहुत और बेकायदे सोने से। (19) गुरुजनों और ब्राह्मणों का अपमान करने से।

कथमिति चेदुच्यते। देवत्वं हि ईशकर्तृकार्योपकरणत्वमिति व्यवस्थापयिष्यते। तच्च सर्वज्ञेन परमेश्वरेणोपदिष्टवैदिकविधिभागे या प्रेरणास्ति तयेष्टसाधनत्व-मनुमाय प्रवृत्तौ सत्यामस्मासु भवितुमर्हति। तथा तत्र नियतफलप्राप्त्या सन्तोषमुखमपि नियतम्। इदमेव सत्त्वगुणस्य स्वरूपमित्येतत् सर्वं विशदी-करिष्यते। एवं रीत्या निश्चितायां फलप्राप्तावीश्वरदासभावेन प्रवृत्तो यो नीतिमान् राजा तस्मिन्नवज्ञापारुष्यानृतभाषणपरदाराग्रहगृहभञ्जनाग्नि-दाहादिक्रोधोत्पादकव्यवहाराभावेन सर्वव्यवहारेष्वालापेषु स्पर्शेषु चेष्टितेषु निर्मितेषु च माधुर्यं स्वतःसिद्धं भवति। प्रमाणपरतन्त्रत्वादबाधितत्वमौचित्यं च भवत्येव। इदमेव देवत्वस्य महत् फलं येन तस्य माधुर्यग्रहणाय पुष्पेषु षट्पदा इव लोकस्य मनांस्याकृष्टानि भवन्ति। इदमेवाकर्षणं राजनीतिशास्त्रे दृष्ट्या आन्दोलनमित्युच्यते। तच्चावेगेऽन्तर्भूतं तदाहुः—

"आवेगस्तु महोत्पातवातवर्षाग्निकुञ्जरैः।
प्रियाप्रियश्रुतैः शत्रुव्यसनाभिहतैरपि॥

अत्र हि आवेगस्याष्टविधो विभाग उक्तः। तत्र प्रियश्रुतिजन्यावेगस्योक्ता-न्दोलनस्वरूप उच्यते। तस्मिन् सति वस्त्राभरणदानालिङ्गनादीनि कार्याणि निसर्गसिद्धान्यनुभावरूपाणि। तदुक्तम्—

"वस्त्राभरणदानाश्रुपुलकालिंगनादिभिः।
अभ्युत्थानेन वर्ण्योऽयं प्रियश्रवणजो बुधैः॥ इति।

एवं च देवभावे स्थितेन राज्ञा प्रियश्रवणप्रयुक्तो लोकेष्वान्दोलनात्मको व्यव-हाराद्यनुभावक आवेगो दृष्टार्थः सञ्चालयितुं शक्यः। लोकमतमप्यावेग-प्रयुक्तं सहजात एव प्राप्तुं सुलभमिति। देवत्वस्यावेगोत्पादनद्वारा दान-मुखेन लोकमतप्राप्तिरूपलोकतन्त्रात्मकदृष्टार्थस्याप्युपकारकत्वं सिद्धम्।

देवा अत्यन्तं पूज्याः।

देवपूजने आत्यन्तिकं च ध्यातव्या देवप्रतिमा यादृशी भवति तदुपासकेषु तादृशस्यैश्वर्यादेः संक्रमणं भवतीति देवपूजनं श्रद्धया कुर्वंत्स्वेकलव्यसदृशेषु इतिहासप्रसिद्धमेव।

'पूर्वं पश्येदृतुस्नाता यादृशं नरमङ्गना।
तादृशं जनयेत् पुत्रं भर्तारं दर्शयेदतः॥' इति।

"ब्रह्माणमीश्वरं विष्णुं स्कन्दं च संप्रेक्ष्याभिवाद्य निष्क्रम्य सूर्याचन्द्रमसाविति। न तु प्रेतपिशाचरक्षांसि। शुद्धस्नाता हि सा यं वा पश्यति मनसा वाभिध्यायति तादृशाचारवत्पुत्रं प्रायेण जनयति। तस्माद् देवगोविप्र (ब्राह्मण) गुरुवृद्धाचार्यान् सतः पश्येत्, कल्याणमनाश्च स्यात्" इत्याद्यायुर्वेदवचनान्यप्येतदुपोद्वलकान्येव। यदि च ध्येयप्रतिमायां वैगुण्यं भवेत् तर्हि ध्यातिमपि वैगुण्यं तन्न्यायेन सम्भवितुमर्हति। तदनुभावमपि वैगुण्यं शुक्रबृहस्पत्योर्नास्ति। अत एव तत्र "कृत्स्नशास्त्रप्रणयनाद् वक्तारौ, देवासुराणां च सन्धिविग्रहप्रयोगात् प्रयोक्तारौ, ऐश्वर्ययोगाच्च देवौ"१ इति वक्ष्यते आचार्येण, तेन तयोर्ध्यानसम्पत्त्या ध्यातर्यपि उक्तगुणत्रयं सम्भवितुमर्हतीति ध्वनितम्।

देवानामेवं पूज्यत्वं खल्वैश्वर्ययोगात्। शुक्रबृहस्पत्योर्हि वैराग्यं धर्मो ज्ञानं चासीत्। तदुक्तमर्थशास्त्रप्रतिपादितान्वीक्षिकीपदव्यवहार्यषष्टितन्त्रसंग्रहरूपायां सांख्यकारिकायाम्—

"अध्यवसायो बुद्धिधर्मो ज्ञानं विराग ऐश्वर्यम्।
सात्त्विकमेतद्रूपं तामसमस्माद्विपरीतम् ।।२ इति

तथैव न्यायसूत्रवार्तिकतात्पर्यटीकायामिदमेव तत्त्वमभिहितमभिसन्धाय—

"नमामि धर्मविज्ञानवैराग्यैश्वर्यशालिने।
निधये वाग्विशुद्धीनामक्षपादाय तायिने ।।"३

इति मंगलं कृतम्। तद्व्याख्याने वचसोऽविशुद्धयश्चतस्रो भवन्ति। तासां निरासो धर्मज्ञानादिभिर्नान्यथेत्यादिवहुविस्तरेण प्रपञ्चितमुदयनाचार्येण तद् यथा—

"नमामीत्यादि। धर्मो निवर्त्तकः, विज्ञानं शरीरादिविविक्तात्मसाक्षात्कारः, वैराग्यं रागाभावः, ऐश्वर्यं भूतेन्द्रियजयः, तच्छालिने, अत एव निधये वाग्विशुद्धीनाम्। अधर्महेतुको ह्यविवेकोऽविवेकहेतुकमवैराग्यम्। अवैराग्यमूलमनैश्वर्यम्। मूलञ्च वचसामविशुद्धयः। तिस्रः खल्वेताः। तत्र प्रथमा

१। अर्थशास्त्र, भूमिका, पृः २ २। सांख्यकारिका, २३
३। न्यायसूत्रवार्त्तिक, पृः १

निरभिधेयता । द्वितीया विपरीताभिधेयता । ता एताः कथं भूतेन्द्रियजयिनो महामुनेर्भविष्यति । अजितभूतस्य हि विवक्षोस्तथाभूतप्रयत्नानिष्पत्तेर्निरभिधेया वाग्भवति । अजितेन्द्रियस्य विपर्यासविप्रलिप्साहेतुको विपरीतार्थो वचनसन्दर्भः । अजितमनसश्च प्रमादोन्मादनवतो निश्प्रयोजनः । एताश्च वचसामशुद्धीः छलजातिनिग्रहस्थानेषु सूत्रकार एव प्रपञ्चयति । 'सोऽयं न तथेति भवति वाग्विशुद्धीनां निधिः । अत एव तायी तत्त्वाध्यवसायसंरक्षणक्षमसम्प्रदायप्रवर्तकः ।"१ इति ।

एवं च धर्मज्ञानादिसम्पन्नाच्छन्नानां ध्याने कृते सत्यात्मन्यपि तत् प्राप्तुं शक्यते । राज्ञां खल्विदमैश्वर्यमेव प्रभुत्वं यस्य प्रभावतः शासनपत्रे लेखारूढ़ो विषयोऽविकृतरीत्या कार्यकरणसमर्थं भवति । एतस्यैश्वर्यस्याल्पीयस्यामपि न्यूनतायां महाननर्थो भवितुमर्हति । रघुनाथराव पेशवामहोदयेन "नारायणरावांशधरा" इति शासनद्वारा आज्ञप्तम् । तत्र मध्ये केनचिद् धस्थाने मापदं संयोज्य शासनं प्रेषितं तस्य परिणामः पेशवा-इतिहासे प्रसिद्धः । इत्युदाहरणमत्र विषयेऽलम् ।

नरो यदि पूर्वोक्तसात्त्विकधर्मज्ञानादिगूणसम्पन्न एकाग्रभूमिकायां स्थितो भवति, तर्हि स एकाकी अपि भवतु नृपतिपदाय शमाय च क्षमो भवति । तदुक्तं दशकुमारचरिते ध्वनितम् "एकशरीरमात्रमपि मर्त्यं चक्रवर्तिनं विदधीमहि । यद्यस्मदुद्दिष्टेन मार्गेणाचर्यते"२ इति ।

राजनीतिशास्त्रे देवत्वस्य नीतिलक्षणानुसारेण कीदृशं स्वरूपं भवितुमर्हतीति अत्र विशदीक्रियते ।

सर्वज्ञस्य परमेश्वरस्य निःश्वासेन प्रसूतो वेदभागः कस्मिन्नप्यंशे सदोषोऽस्तीत्यद्य यावत् केनापि प्रमाणपुरःसरं न साधितम् । तत्र यो विधिभागस्तत् प्रेरितमेव यद्यस्माभिः सहर्षमनुष्ठेयत्वेन स्वीक्रियते तर्ह्यस्मासु वेदपरम्परया प्राप्ता ज्ञानप्रभा सफलत्वादानन्दप्रभामिश्रिता सती सत्त्वगुणरूपेण प्रकटीभवतीति स्फुटमेवावगतम् ।

अत्र वेदप्राप्ता ज्ञानप्रभा येन साधिता तस्य मनो वाक् प्राणश्च भगवतः

१। उदयन, पृः ७

२। दण्डी, दशकुमारचरित, अष्टम उच्छ्वास, पृः १९७-१९८

परमेश्वरस्योपकरणभूता भवन्ति। तदा तेषु देवत्वं भवति। अन्यथा तु न। समये केवलं मनःप्राणवाक्संज्ञयैव ते व्यवह्रियन्ते। तेषां स्वरूपं नीतिलक्षणानुसारेण प्रसंगाद् विमृश्यते। तथा हि—

सत्त्वपरिणामिद्रव्यं मनः, रजःपरिणामिद्रव्यं प्राणः, तमःपरिणामिद्रव्यं वागिति। तदुक्तम्—

"यत् सत्त्वपरिणामि स्याद् द्रव्यं तन्मन उच्यते।
यद् रजःपरिणामि स्याद् द्रव्यं स प्राण उच्यते॥
यत्तमःपरिणामि स्याद् द्रव्यं सा वागुदाहृता।"

अत्र द्रव्यमित्यनेन जीवोत्पत्तिविचारे भावप्रकाशनोक्तदिशा शुक्रशोणितात्मकं ग्राह्यमित्यभ्यूह्यते। तदाहः—

द्वाभ्यां त्रयाणां व्यक्तिः स्यात् त्रिभ्यो भवति पञ्चकम्।
पञ्चभ्यः पञ्चकानां तु चतुष्कं प्रतिपद्यते॥
वीजगतं (शुक्रार्तवौ) द्वयं तत्र त्रितयं तु गुणत्रयम्।
भूतानि श्रवणादीनि शव्दवागादिपञ्चकम्॥
भाषणादीनि वाक्यादिचतुष्टयमुदाहृतम्।
तत्संशयप्रमातृत्वनिश्चयानुभवार्थकृत्॥ इति

इदं बीजगतं देहारम्भकावयवात्मकं द्रव्यं 'वहु स्यां प्रजायेय'[१] इति श्रुतेः सङ्कल्परूपमेव। स च संकल्पो गुणत्रयभेदेन त्रिधा भवति।

तत्र सत्त्वपरिणामिसङ्कल्पात्मकं द्रव्यं जीवनिष्ठायां मन इति व्यपदिश्यते। तदेव सत्त्वपरिणामि द्रव्यमीश्वरे मुक्ते च समवेतायां सङ्कल्प इति व्यपदिश्यते। एवमेव तदेव द्रव्यं सङ्कल्पात्मकं रजोरूपपरिणामि जीवनिष्ठायां प्राणः। ईश्वर-मुक्तयोः समवेतं स्पन्द इति व्यपदिश्यते। तथैव तदेव द्रव्यं सङ्कल्पात्मकं तमः-परिणामि जीवसमवेतं शव्दरूपतां भजते। ईश्वरसमवेतं शोभना वाग् भवति।

तदुक्तम्—ईश्वरस्य च मुक्तानां तत्संकल्पो भविष्यति।
संसारिणां मनस्त्वेन परिणम्य प्रवर्त्तते॥
ईश्वरः स च मुक्तानां क्रियाहेतुः स ईरितः।
संसारिणां पुनरसौ प्राणाकारेण तिष्ठति॥

---

१। छान्दोग्योपनिषत् ६।२।३

यत्तम:परिणामि स्याद् द्रव्यं सा वागुदाहृता ।
ईश्वरस्य च मुक्तानां सा वाग् भवति शोभना ।।
संसारिणां परिणमेच्छब्दाकारेण सा पुनः ।
ऊक्ता क्रोधादिभिर्भावैस्तत् फलाव्यभिचारिणी ।।
या मुक्तेश्वरवागुक्ता सा वाणीत्युच्यते बुधैः । इति ।

एतेनेदं सिद्धम्—ईश्वरे मुक्ते च जीवे च स्थित्वा विभिन्नविभिन्ननाम्ना व्यपदिश्यमाना मनःप्राणवाचः सत्त्वरजस्तमःपरिणामिरूपा द्रव्यात्मिकाः कार्यं कुर्वन्ति । ये च रविश्चन्द्रो वह्निरित्यादिनाम्ना तत्र तत्र पुराणेषु देवा व्यपदिश्यन्ते ते एव जीवस्य तत्तत्स्थानेषु स्थित्वा कार्यं प्रचालयन्तीति । तदुक्तं भागवते—

दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः"[१] इत्यादि ।

एतेषु देवेषु रविः सोमवह्नयः मनः प्राणवाग्रूपा एव सन्ति ।[२] तदुक्तं—

रविः सोमश्च वह्निश्च तस्य तस्य यथाक्रमम् ।
अधिष्ठातार इत्येषा व्यवस्था योगिभिः कृता ।।
तत्तद्रूपमधिष्ठाय तिष्ठन्नात्मा च तन्मयः ।
एते मनः प्राणवाचो मुक्तानामीश्वरस्य च ।। इति ।

एवं चोपाधिभेदेन देवत्वं मनस्त्वादि च तेषु तेषु सिद्धम् । स चोपाधिः कार्योपकरणत्वात्मकत्वाद्देवा इत्येव कीर्त्तिताः[३] इति सुश्रुतोक्तरीत्या कार्योपकरणत्वम् । तच्च कार्यं जीवस्येश्वरस्य च भेदेन द्विधा भवति । तत्रास्मिन्नेव शरीरे यदा जीवस्य कर्तव्यमस्ति तदा इमे मनः प्राणवाचः जीवकार्योपकरणानि भवन्ति । यदा त्वीश्वरकर्तृत्वं तदा तु ते ईशकार्योपकरणानि भवन्ति । तदैव च त एव च देवा इति व्यपदिश्यन्ते । जीवस्य कर्तृत्वेऽयं स्वतन्त्रः । ईशस्य कर्तृत्वे तु सः स्वतन्त्रः । इत्यन्यदेतत् । ईशकार्य एते उपकरणानि स्युस्तर्हि ईशकार्योपकरणत्वं देवत्वं तेषां बोध्यम् । यथाश्रुतनामैव जीवकार्योपकरणत्वे तु मनः प्राणवाङ्नाम्ना ज्ञाप्यते ।

१ । भागवत, २।५।३०ख
२ । "तिस्र एव देवता इति नैरुक्ताः" यास्क, निरुक्त, दैवतकाण्ड ।
३ । सुश्रुतसंहिता, पृः ४१३, ६।३

आपाततो जीवेन सह सम्बद्धस्य शरीरस्य चेष्टां प्रतीश्वरस्यापि कर्तृत्वं जीवकर्तृत्वमिव न प्रसिद्धम् । तथापि विचार्यमाणे ईश्वरोऽपि शरीरचेष्टां प्रति सञ्चालयन् जीवे वर्त्तत इत्यवश्यं वक्तव्यं भवतीति । तथा हि—

"अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ।। इति
"जाठरे भगवानग्निरीश्वरोऽन्नस्य पाचकः"
"समानोऽग्निसमीपस्थः कोष्ठे चरति सर्वतः ।
अन्नं गृह्णाति पचति विवेचयति मुञ्चति ।।"

इत्यादिवचनप्रामाण्यानुसारेणोपभुक्ताहारपचनकर्तृत्वं भगवत ईश्वरस्यैवास्ति इति सिध्यति । शरीरान्तरवर्तिनीनां मांसपेशीनां चेष्टायां विचार्यमाणायां सत्यां तत्कर्तृत्वमपि शारीरविज्ञानानुसारेणेश्वरस्यापि सिध्यति । तथा हि शरीरे मांसपेश्यो द्विविधा वर्त्तन्ते । तासु काश्चन मांसपेश्यो जीवसञ्चालनाधीनाः सत्यश्चेष्टन्ते । यथा करप्रसारणसङ्कोचनादिकारिण्यः पेश्यः । जीवो जागृतिदशायां चेष्टमानः स्वशरीरं परिश्रान्तो दुःखमनुभवन् विश्रान्तिमीहते । यदि स न विश्रम्येत तर्हि भुक्तस्याहारस्य प्रसारादिरूपेण परिणामो न भवतीति आयुर्वेदे सिद्धम् । जीवस्य विश्रामो हि निद्रात्मकः । तदवस्थायामस्य सर्वाश्चेष्टा अवरुद्धा भवन्ति ।

तदवस्थायां समानवायुभुक्ताहारं रसरूपेण परिणतं तत्तच्छिराद्वारा सर्वत्र सञ्चारयति । सञ्चरणसमये शिराः स्वमुखमुद्घाटयन्ति । रसग्रहणानन्तरं मुखं विदधति । अयं शिराणां व्यापारः कस्य प्रेरणया निद्रासमये प्रचलतीति विचार्यमाणे सुप्तस्य जीवस्य कर्तृत्वबाधात् कश्चनान्यः कर्ता वर्त्तत इत्यनुमीयते । स ईश्वरान्नातिरिक्तः ।

कर्तृत्वं हि स्वातन्त्र्यापरपर्यायं "स्वतन्त्रः कर्त्ता"[१] इति पाणिनीयसूत्राभिधानात् । तच्चोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वरूपमिति तत्र तत्र नैयायिकैः प्रतिपादितं वर्त्तते । ईदृशं स्वातन्त्र्यं यत्र स एव चेतनः । यत्र तन्नास्ति सोऽचेतनः जड इत्यर्थः । सम्मतं चैतद् वैज्ञानिकानामपि ।

---

१। पाणिनि, १।४।५४

एवं च निद्रावस्थायामबाधितरूपेण जड़ात्मकशिरामांसपेशीप्रभृतीनां सञ्चालनं कश्चन जाग्रत् कुर्वाणः स्वतन्त्रः चेतनोऽस्ति। स स्वतन्त्रत्वादीश्वर एव।

अतः शरीरे उपाधिभेदेन जीवस्येश्वरस्य च कर्तृत्वं सिद्धम्। मनः-प्राणवाचोऽपि जीवकर्तृकक्रियायां यदा कारणभूता भवन्ति तदा स जीवो देवो वा भवतु मानवो वा यः कोऽपि वाल्पज्ञत्वादबाधिते एवार्थे प्रेरयेदिति न नियमः। एवं स्थिते देवोऽपि जीवस्तत्कालं भ्रान्त इति वक्तुं शक्यते। अत एव शुक्राचार्यः सुरया सह राक्षसैः शिष्यस्य कचस्य अस्थिचूर्णितं भ्रान्त्या पपावितीतिहासप्रसिद्ध एव। एतस्यामवस्थायां शक्रबृहस्पतिशुक्रादीनां वचनमप्यननुष्ठेयत्वरूपमप्रामाण्यमावहति। यदा किल मानवोऽपि एकाग्र-भूमिकायां तिष्ठन्नैश्वर्यादिगुणचतुष्टयसम्पन्नः स्वकीयं कर्तृत्वमपहायेश्वरस्य कर्तृत्वेऽभिमुखस्तदेशकर्तृकक्रियायां करणभूता मनःप्राणवाचः रविसोमवह्नि-देवतात्मिका ध्यायन्ति, चेष्टन्ते, समीहन्ते, तस्मिन्नबाधितत्वादनुष्ठेयत्वरूपप्रामाण्यं निर्विवादमेव। अतो जीवदशायां शुक्रेणोक्तस्य मुक्तभावेन स्थितेन कौटिल्येन कृतः प्रतिषेध ईश्वरभावेन स्थितस्य शुक्रस्य नमनमपि युक्तमेव। अर्थात् सर्वत्र नीतिशास्त्रे देवत्वमीशकर्तृकक्रियोपकरणत्वात्मकं बोध्यम्।

गुरुभक्तिपूर्वकं ज्ञानाभिवृद्धौ सम्पादितायां शरीरान्तर्गतधातुष्वष्टमस्य शुक्रसारभूतस्य ओजसो धातोः रक्षणं भवति। तस्मादेव शरीरस्यापि सुरक्षा। स धातुः सर्वशरीरे शाखारूपेण स्थिताभिर्हृदये च मूलरूपेणावस्थिताभि-र्दशशिराभिः प्रवहति। तेनैष शरीरस्य चेष्टितं निबद्धं भवतीति साहित्यायुर्वेदा-भ्यामवगम्यते। तद् यथा—

दशजीवनधामानि शिरो रसनबन्धनम्।
कण्ठो स हृदयं नाभिर्वस्तिशुक्लो गुदौजसि॥
दशस्थूलशिराहृत्स्थास्ताः सर्वाः सर्वतोवपुः।
रसात्मकं वहन्त्योजस्तन्निबद्धं हि चेष्टितम्॥
विद्यन्ते तास्ततः सप्त शतान्यासां भवन्ति तु।
शिरा जालधरानाम तिस्रश्चाभ्यन्तराश्रयाः॥
इड़ा च पिंगला चेति सुषुम्ना चेति नामतः। इति।

अत ओजसः संरक्षणाय गुरुभक्तिं द्वारीकृत्य शास्त्रप्रसूतं ज्ञानमपेक्षितमिति।

यथा यथा पूज्यानां गुरूणां चरणौ सत्त्वबलेन चिन्तितौ स्यातां तथा तथा गुरुस्वरूपे वर्त्तमानस्य सत्त्वबहुलस्य ज्ञानतत्त्वस्य संक्रमणेन ओजो नितरामुच्छलति तेन स्वशरीरस्य नैर्मल्यं सर्ववेत्तृत्वं सर्वशक्तिमत्त्वं प्रभुत्वं च संप्राप्तुं नाशक्यम्, । इदमलौकिकं वस्तु । साधारणीकरणव्यापारमहिम्नानुकार्यं स्थितानां तत्तद्रसानां सामाजिकेषु संक्रमणं यथा भवति तथैव ध्यानेनापि गुरुसमवेतभावानां शिष्येषु संक्रमणं भवितुमर्हति । अत एव योगिन आहारं विनाप्येकाग्रतया ध्यानमात्रेणाभीप्सितान् शरीरारोग्यकरान् रसादीन् सञ्चारयन्तस्तदानन्दमहिम्ना अन्तस्थज्वलनसम्भूतं विषं विनाश्य वहिः स्थितस्य प्राणस्यान्तःप्रवेश्यमनपेक्ष्यैव चिरकालं प्राणायामादीन् संसाधयन्ति । सिद्धं च साधयन्ति । ओजश्चानन्दप्रभामिश्रिताया ज्ञानप्रभायाः परिणामभूतं वस्तु । तदुक्तं चरके ओजो वर्धकम् ।

"हृद्यं तत् स्याद् यदौजस्कं स्रोतसां संप्रसाधनम् ।
तत्तद् यत्नेन संसेव्यं प्रशमो ज्ञानमेव हि ॥"१ इति ।

औजस्यं ज्ञानं तदेव भवति यत्प्रमाणत्रयसमन्वितं भक्तिपुरस्सरं गुरुप्रसादलब्धं च । गुरुतत्त्वं च साक्षी चेतन ईश्वर एव । स एव मस्तिष्कभागे स्थितः प्राणादिसञ्चारणद्वारा जीवनमूलभूतं चरकोक्तरीत्या ज्ञानद्वारा ओजः प्रयच्छति । तदा प्रमाणत्रयसमन्वितार्थस्य प्रकाशमुपलभ्य जीव आत्मानं गोपयितुं समर्थो भवति । यदि सोऽप्रसन्नस्तर्हि विपरीतार्थप्रकाशमुपलभ्य जीव आसक्तिमनुभवति । यदाहुः—

न देवा दण्डमादाय रक्षन्ति पशुपालवत् ।
यन्तु रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम् ॥
न कालः खड्गमादाय शिरः कृन्तति कस्यचित् ।
कालस्य बलमेतावद् विपरीतार्थदर्शनम् ॥ इति ।

येनैकाग्रभूमिकायां स्थित्वा सत्त्वं प्रधानीकृत्य पूज्या गुरवस्तस्य ओजसः सम्पादनेन सिद्धिरपि न दूरा । तथा हि—

विजेतव्या लङ्का चरणतरणीयो जलनिधि-
र्विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः ।

---

१ । सुश्रुतसंहिता, पृः ६४२, ७।१७

तथाप्येको रामः सकलमवधीद्राक्षसकुलं
क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ।। इति ।

अत्र सत्त्ववतो रामस्य सहायभूताः कपयः सचेतना आसन् नात्र आश्चर्यम्, ते तु सचेतनाः। अचेतना अपि सचेतनवत् साहाय्यं कुर्वन्ति यत्र तर्हि सचेतनानां का कथा !

ये मज्जन्ति निमज्जयन्ति च परान् ते प्रस्तरा दुस्तरे
वार्यांवीरास्तरन्ति वानरभटान् सन्तारयन्तेऽपि च ।
नैते ग्रावगुणा न वारिधिगुणा नो वानराणां गुणाः
श्रीमद्दाशरथेः प्रतापमहिमा सोऽयं च संजृम्भते ।। इति ।

ननु मंगलप्रसंगे गुरुनामसंकीर्तनं मूलकृता कथं कृतम् ? यतो हि—

"आत्मनाम गुरोर्नाम नामातिकृपणस्य च ।
श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः ।।"

इति स्मृतौ निषेधात् । अत्र तु वक्तव्यम्—एतादृश्याशङ्का न युक्ता तथाविधाचारदर्शनात् । यत्र सदाचारो धर्ममूलः स्मार्त्तः श्रौतो वा विधिः कर्त्तव्यं विदधाति तत्र निषेधस्य प्रसक्तिर्न भवति इति मीमांसायाः सिद्धान्तः ।

प्रणतिसमये गुरूणां पूज्यानां वा यदैश्वर्य्यं देवत्वं वक्तृत्वं प्रयोक्तृत्वादि च पूज्यत्वनिमित्तं स्मर्त्तव्यं भवति तदा गुरुपितृप्रभृतीनामुल्लेख आचारसिद्धः । तद् यथा मधुसूदनसरस्वतीभिः सिद्धान्तबिन्दुग्रन्थारम्भे भगवत्पूज्यपादानां श्रीशंकराचार्याणां नामग्राहं लक्षणं कृतम् । एवमभिवादनादौ संकल्पादौ च स्वनामोच्चारणमप्येतन्न्यायेनैव न दोषावहमिति ।

अत्रायं सन्देहः स्यात्—शुक्रबृहस्पती खल्वैश्वर्यसम्पन्नौ देवौ ; तर्हि कथं तदीयमतस्य क्वचिन्मूलकृता "नेति कौटिल्य"१ इत्युक्त्या प्रतिषेधः कृत इति । तत्रोत्तरं त्वेवं द्रष्टव्यम्—

सर्वेऽपि सचेतनाः स्वकृत्येशरूपतां जीवरूपतां वा प्राप्नुवन्तीति पूर्वं प्रपञ्चितमस्ति । यदा किलेश्वरकर्तृकक्रियोपकरणत्वरूपदेवत्वमात्मनि तत्रोक्तरीत्याविर्भवति तदा प्रतिपाद्यार्थविषये यथार्थदर्शनं भवति । यदा च

१ । अर्थशास्त्र, १।१९

तदनुपकरणत्वं जीवत्वम्, तदा तस्य विपरीतार्थोऽपि दृष्टिगोचरो भवितुमर्हति। तन्न्यायेन शुक्रबृहस्पती अपि जीवभावेन देवभावेन वा स्थातुमर्हतः। एवं स्थिते यदा तौ जीवभावमवलम्ब्य ब्रूतस्तदा तद्वचने प्रमाणत्रयस्य नीतिलक्षणदृष्ट्या समन्वयः कर्त्तव्य एव। तद्बाधायां तावानंशोऽस्माभिरननुष्ठेयः। सर्वथा-प्रमाणमिति तु न मन्तव्यम्। तस्यापि सत्यवसरे कैश्चिदनुष्ठीमानत्वात्तेषां कृते सफलत्वाच्च। वस्तुतः शुक्रबृहस्पत्योर्मतश्च चाणक्यनिर्दिष्टमतेन सह समन्वय एवास्तीति विवेचयितुं यथासम्भवं प्रयतिष्यते।

ननु चाणक्यो मनुष्यः शुक्रबृहस्पती च देवौ स्त इति देवतानां वचनापेक्षया मानववचने दोषबाहुल्यं सम्भवितुमर्हति। तथा सति मानववचने देववचनापेक्षया विशेषतः प्रामाण्यं कथं स्वीक्रियतामिति चेन्न। वचनानां स्वरूपतो निर्दोषत्वेऽपि भ्रमप्रमादादिदोषप्रयुक्तमेव वक्तव्यम्। यदि च पूर्वोक्तरीत्या मनुष्यो धर्मज्ञानविरागैश्वर्यसम्पन्नः सन् वक्ति तर्हि तद्वचने अप्रामाण्यकल्पनाया अवसर एव नास्ति। एवं रीत्या एकाग्रभूमिकायां स्थितस्यास्य तस्य मुक्तत्वे नास्ति शङ्का। ऐश्वर्यादिसम्पन्नस्य मानवस्यापि वाक् मुक्तानामेव वाग् भवितुमर्हति। सा चोपर्युक्तभावप्रकाशनोद्धृतवाक्याद् अव्यभिचरितफला भवतीति स्थितम्, एवं च "उपर्युपरि बुद्धीनां चरन्तीश्वर-बुद्धयः"१ इत्युक्त्या मुक्तानां तत्समकक्षाणां वा उपरिबुद्धित्वात्तेषां वाक् प्रमाणभुता भवत्येवेति तथाविधः सन् जीवभावदशायां स्थितयोः शुक्रबृहस्पत्यो-र्मतखण्डनमपि तर्हि तद् युक्तमेव। तथा—

युक्तियुक्तमुपादेयं बालादपि सुभाषितम्।
त्याज्यं तद् विपरीतं तु अप्युक्तं पद्मयोनिना॥

चाणक्येनाप्युक्तम्—

शास्त्रं विप्रतिपद्येत धर्मन्यायेन केनचित्।
न्यायस्तत्र प्रमाणं स्यात्तत्र पाठो हि नश्यति॥२ इति।

चाणक्येन मानवेन समयानुसारेण लोकस्थितिं दृष्ट्वा पूर्वाचार्यमतं प्रतिषिद्धम्। इत्यस्माभिरपि वर्त्तमानदेशकालपरिस्थितिमवलोक्य तन्मतस्यापि परिवर्तनं

---

१। भट्टोजिदीक्षित, सिद्धान्तकौमुदी, तत्त्वबोधिनी, on वार्त्तिक १४४४
२। अर्थशास्त्र, ३।१

कर्त्तुं शक्यत इति शङ्कापास्ता। अपि च नीतिशास्त्रस्य वर्त्तमानसमयेऽपि तथाविधमेवाभ्यर्हितत्त्वमस्तीति नात्र सन्देहस्यावसरः। जयमंगलोक्तं मतं त्वत्र विषयेऽग्रे यथावसरमत्र केचिदाहुरित्यादिना ग्रन्थेन निरूपयिष्ये।

स्वत्वास्पदीभूतस्य स्वस्मादनन्तरं रक्षणार्थं तु तीर्थप्रतिपादनं कर्त्तव्यम्। तीर्थप्रतिपादनं तावद् गुणवति पुत्रादौ निक्षेपः, अश्वमेधादौ विनियोगः। अगुणश्चेत् पुत्रः धनं प्राप्य प्रमादेनार्थं विनाशयेत्। राज्यसंरक्षणक्षमे अपरस्मिन् तु पुत्रसदृशे गुणवत्यपि न तीर्थप्रतिपादनं कार्यम्। तेन पुत्रे आत्मसम्पद्गुणेषु कुलीनत्वलाभोऽपि वोध्यः। गुणवत्पुत्राभावेऽश्वमेधादौ सम्पत्तेर्विनियोगो वरो न तु दुष्टहस्ते।

सर्वा दिशो विजित्यैकत्रसञ्चितायाः सम्पत्तेर्विभजनं यदि राजा न करोति तर्हि विद्याकलाप्रभृतीनां राज्यस्थित्युपायेषु मूलभूतानां संरक्षणं न भवेत्। तदर्थं सञ्चितायाः सम्पत्तेर्विभज्यदानमवश्यं कर्त्तव्यम्। तच्च सत्त्वसम्पत्तेः सूचकम्, यद्यपि यज्ञादन्यत्रापि सम्पत्तेर्दानं भवितुमर्हति तथापि यज्ञसंस्थैव ईदृशी वर्तते एवं सर्वासां विद्यानां कलानां संरक्षणं सर्वेषां सेवा-द्वारा समस्तानां रक्षणं समस्तदेवताप्रसादः सुशिक्षादिसमृद्धिश्च भवितुमर्हति। तथा धर्मभावनाया वेदमूलिकाया जागरूकत्वात् तन्मूलः सन्धिश्च स्थिरो भवति। तेन सर्वेषामनुरागपात्रता च नियता। अत एव सन्धेयधार्मिकत्वमपेक्षितमिति प्रतिपादितम्। तथा हि—

सत्यार्यौ धार्मिकानार्यौ भ्रातृसङ्घातवान् वली।
अनेकयुद्धविजयी सन्धेयाः सप्त कीर्तिताः॥ इति।

तथा—

ज्ञानं तपो यज्ञविधिः प्रदानमेते कृतार्थाः सुकृतावतारा:।
एतैः समाकृष्य जगन्ति धर्मः सन्तापयामास बलादधर्मम्॥ इति

सर्वेषां वर्णानामाश्रमाणां च तत्तद्वृत्तिजीविकानां चान्तः वहिर्वा कुत्रचित् अधिकारानुसारेणोपयोगो वर्त्तत एव। अतो यज्ञसंस्थातिरिक्तसंस्थासु स्थायि-सन्ध्यनुकूलं सम्पत्तेर्विभज्य दानं भवितुमर्हतीति वक्तुं न शक्यते। सन्धेः स्थिरताविषये सत्त्वभावस्यापौरुषेयवेदमूलकस्य यज्ञादिकर्मणोऽङ्गत्वं कथं

भवतीति "शान्ति का अग्रदूत" ग्रन्थे सप्रमाणमुपन्यस्तमस्ति। अतोऽत्र पुनस्तन्न विमृश्यते। एवं चाश्वमेधादौ सम्पत्तेर्विनियोगे राज्ञि अपेक्षितस्य राज्याधारभूतस्य सत्त्वस्याभिव्यक्तिर्भवति। अत्राश्वमेध एव न विवक्षित आदिपदात् सत्त्वगुणस्य परिचायकादिर्यद्यद् येषु येषु धर्मेष्वभिव्यज्यते ते ते सर्वधर्माः सन्धायका अत्र विवक्षिताः।

नीतिशास्त्रमपि लाभपालनोपायप्रतिपादनादर्थशास्त्रान्नान्यदिति जयमंगलायां प्रदर्शितम्।

यत्र हि कौटिल्येन न निषिद्धं न वा स्वमतमित्युक्तं तत्सर्वं पूर्वाचार्यसम्मतमेव ज्ञेयम्। विशेषविधिनिषेधयोः शेषनिषेधाभ्यनुज्ञाकल्पकमिति न्यायात् पूर्वानुमतो भवतः।

प्रजानामायुषो ह्रासो यथा जयमंगलायामुक्तस्तत्र मूलं महाभारते ज्ञेयम्, तद् यथा

ततोऽध्यायसहस्राणां शतं चक्रे स्वबुद्धिजम्।१
ततस्तां भगवान्नीतिं पूर्वं जग्राह शङ्करः।
ब्रह्मरूपो विशालाक्षः शिवः स्थाणुरुमापतिः॥
प्रजानामायुषो ह्रासं विज्ञाय भगवाञ्छिवः।
संचिक्षेप ततः शास्त्रं महार्थं ब्रह्मणा कृतम्॥
वैशालाक्षमिति प्रोक्तं तदिन्द्रः प्रत्यपद्यत।
दशाध्यायसहस्राणि सुब्रह्मण्यो महातपाः॥
भगवानपि तच्छास्त्रं संचिक्षेप पुरन्दरः।
सहस्रैः पञ्चभिस्तात यदुक्तं बाहुदन्तकम्॥
अध्यायानां सहस्रैस्तु त्रिभिरेव बृहस्पतिः।
संचिक्षेपेश्वरो बुद्धया बार्हस्पत्यं तदुच्यते॥
अध्यायानां सहस्रेण काव्यः संक्षेपमब्रवीत्।
तच्छास्त्रममितप्रज्ञो योगाचार्यो महायशाः॥
एवं लोकानुरोधेन शास्त्रमेतन्महर्षिभिः।
संक्षिप्तमायुर्विज्ञाय मर्त्यानां ह्रासमेव च॥२ इति।

१। महाभारत, शान्तिपर्व, ५९।२९क
२। महाभारत, शान्तिपर्व, ५९।८०-८६

उदयनाचार्या अपि ह्रासकारणं कुसुमाञ्जलौ व्यवृण्वन् । तद् यथा—

जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्मणोः ।
ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयताम् ॥१ इति ।

सम्प्रदायस्य वेदादिसम्प्रदायस्य ह्रासोऽनुमीयताम् । कुतः जन्मादेर्ह्रासदर्शनात् । प्रयोगश्च वेदादिसम्प्रदायोऽयमत्यन्तमुच्छिद्यते ह्रसमानत्वात् प्रदीपवत् । स्वरूपसिद्धयुद्धारायाह—जन्मेति । पूर्वं मानस्यः प्रजास्ततः पुत्रमात्रार्थिताप्रयुक्तमैथुनजाः सम्प्रति सम्भोगकामिप्रवृत्तार्वाजितजन्मान इति जन्मह्रासः । पूर्वं चरुप्रभृतिषु संस्कारः, ततो गर्भस्ततो जननानन्तरमिदानीं कथञ्चिदिति संस्कारह्रासः । पूर्वं सहस्रशाखस्य चतुर्वेदाध्ययनं तत एकस्याः शाखाया इत्यादिक्रमेण विद्याह्रासः । विद्यादेरित्यादिना वृत्तिधर्मादिसंग्रहः । पूर्वमुञ्छशिलवृत्तयस्ततः कृष्यादिवृत्तयस्ततः सेवावृत्तय इति वृत्तिह्रासः । पूर्वं तपोज्ञानयज्ञदानात्मकश्चतुष्पाद्धर्मस्ततस्त्रेतादावेकैकह्रासः कलौ च विसंष्ठुलस्खलद्दानैकपादिति धर्मह्रासः । पूर्वं यज्ञशेषभुक् ततोऽतिथिशेषभुक् ततः स्वार्थसाधितभुजस्ततो भृत्यादिसहभुज इत्यादि धर्मह्रासः स्वाध्यायस्याध्ययनस्य कर्मणो यागादेः शक्तेः सामर्थ्यस्य ह्रासात् । अध्ययनशक्तेः कारणस्य ह्रासाद् विद्याशक्तेः कार्यस्य ह्रास इति पृथङ्निर्देशः । एवं रीत्या अतिचिरन्तनकालाद् ह्रासे प्रवृत्तेऽपि भगवदनुकम्पयैकाग्रभूमिकासंपन्नेन गुरुभक्तेन चाणक्येनार्थशास्त्रमहोदधिं निर्मथ्यामृतवत् संक्षिप्तमिदमर्थशास्त्रं प्रदत्तं महते उपकारायास्मासु समभूत् । यस्य तु सात्त्विकी प्रज्ञा नास्ति न वा वेदानुगामिनी न च वेदाध्ययनेन धारणावती तेन स्वपारं शास्त्रं निर्मथ्य वास्तविकं सप्रमाणममृतमुद्धृत्य मार्गः प्रदर्शयितुं न शक्य इति तु निश्चितमेव । अत एव सन्ति केचन शिष्टा ये जन्मत एव यथाशास्त्रं विनाप्यधीतिं साधुशब्दं प्रयुज्यते । तेषामात्मसन्तोषो व्याकरणेनासाधितेषु प्रयोगेषु साधुत्वस्य निर्णायको भवति । अतथाविधैर्यथेच्छं व्यवहृतः प्रयोगः साधुत्वपरिचायको न भवति । तद् यथा महाभाष्ये—

"पृषोदरादीनीत्युच्यते । कानि पृषोदरादीनि ? पृषोदरप्रकाराणि । कानि

---

१ । उदयन्, कुसुमाञ्जलि, द्वितीय स्तवक, ३

पं स १७८ ]

पुनः पृषोदरप्रकाराणि ? येषु लोपागमवर्णविकाराः श्रूयन्ते, न चोच्यन्ते। अथ 'यथे'ति किमिदम् ? प्रकारवचने थाल्१। अथ किमिदमुपदिष्टानीति ? उच्चारितानि। कुत एतत् ? दिशिरुच्चारणक्रियः। उच्चार्य हि वर्णानाह। उपदिष्टा इमे वर्णा इति। कैः पुनरुपदिष्टानि ? शिष्टैः। के पुनः शिष्टाः ? वैयाकरणाः। कुत एतत् ? शास्त्रपूर्विका हि शिष्टिः। वैयाकरणाश्च शास्त्रज्ञाः। यदि तर्हि शास्त्रपूर्विका शिष्टिः शिष्टिपूर्वकं च शास्त्रम्, तदितरेतराश्रयं भवति। इतरेतराश्रयाणि च न प्रकल्पन्ते। एवं तर्हि निवासतश्चाचारतश्च। स चाचार आर्यावर्ते एव। कः पुनरार्यावर्तः ? प्रागादर्शात् प्रत्यक् कालकवनात्। दक्षिणेन हिमवन्तमुत्तरेण पारियात्रमेतस्मिन्नार्यावर्ते आर्यनिवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद्विद्यायाः पारं गतास्तत्रभवन्तः शिष्टाः। यदि तर्हि शिष्टाः शब्देषु प्रमाणम्, किमष्टाध्याय्या क्रियते ? शिष्टपरिज्ञानार्थाष्टाध्यायी। कथं पुनरष्टाध्याय्या शिष्टाः शक्या विज्ञातुम् ? अष्टाध्यायीमधीयानोऽन्यं पश्यत्यनधीयानं ये वास्यां विहिताः शब्दास्तान् प्रयुञ्जानम्। स पश्यति—नूनमस्य दैवानुग्रहः स्वभावो वा योऽयं न चाष्टाध्यायीमधीते, ये चास्यां विहिताः शब्दास्तांश्च प्रयुङ्क्ते। नूनमयमन्यानपि जानातीति। एवमेषा शिष्टज्ञानार्थाष्टाध्यायी"२ इति।

शिष्टोपाध्यायनिर्भरणं प्रदर्शयता भाष्यकारेण कौटिल्या एव स्मृता इति प्रतिभाति। अयमेव न्यायस्तथाविधैः प्रणीतेष्वन्यसमस्तशास्त्रेषु बोध्यः।

क्वचित् कौटिल्येन पूर्वाचार्यमतं प्रतिषिध्योपन्यस्ते मते शास्त्रसम्मतत्त्वं वेदमूलकत्वं च नास्तीत्यस्य मतस्य शब्दप्रमाणकत्वं कथं भवितुमर्हति ? इत्ययमंशोऽवश्यं विचारणीयतामर्हति। तत्रोच्यते—

सर्वोऽपि विषयः शास्त्रेण कण्ठत उक्त इति नास्ति स्थितिः। अत एव शास्त्राधीनमहावाक्यतात्पर्यनिर्णयार्थं मीमांसापद्धत्या न्यायानामुपयोगः शास्त्र-

---

१। पाणिनि, ५।३।२३

२। पतञ्जलि महाभाष्य, on पाणिनि 'पृषोदरादीनि यथोपदिष्टम्' ६।३।१०९

कृद्भिः क्रियते । तद्द्वारा निर्णीतोऽर्थः शास्त्रमूलको न वेति न विप्रतिपद्यन्ते । युक्तिहीनविचारे तु धर्महानिः प्रजायते । यथा—

धर्मे प्रणीयमाने तु वेदेन करुणात्मना ।
इतिकर्त्तव्यताभागं मीमांसा पूरयिष्यति ।।२

इत्यादिवचनात् । तथैव नीतिशास्त्रविषयेऽपि मीमांसादिसमस्तशास्त्रदृष्ट्या विचार्यते तर्हि कौटिल्यवचनस्यापि नीतिशास्त्रमहावाक्यार्थनिर्णये उपयोगित्वात्तत्र वेदमूलकत्वं शास्त्रसंमतत्वं च वक्तुं शक्यते । तथा हि—शास्त्रं द्विविधं भवति, अदृष्टार्थकं दृष्टार्थकं च । तत्रादृष्टार्थकं शास्त्रं यजेत उपासीत अग्निहोत्रं जुहोतीत्यादिकम् । ईदृग्विधेषु विधिषु धात्वर्थोऽदृष्टोत्पत्त्यर्थमज्ञातत्वाद् विधीयते । नास्त्यत्र न्यायापेक्षा । दृष्टार्थकं च शास्त्रं व्रीहीनवहन्तीत्यादिकम् । एवंविधेषु विध्विष्ववघातादिः धात्वर्थो वितुषीकरणादिरूपेष्टसाधनत्वेनेति स नाज्ञातो न विधीयते । अत एतादृशस्थलेषु स्वाध्यायोऽध्येतव्य इति वचनवलेनाध्ययनभाव्यकत्वेन ज्ञातानामुक्तविधीनां निष्प्रयोजनत्वपरिहाराय नियमादिविधित्वं यथायोग्यं मीमांसान्यायाधीनं गौरवलाघवमर्यादया वोध्यं भवति । न ह्येतत्कल्पने वेदमूलकत्वं शास्त्रसम्मतत्वं वा कैश्चित् स्वीक्रियते । स एव न्यायोऽर्थशास्त्रव्यवहारशास्त्रादिषु (व्यवहारप्रकाशादिषु द्रष्टव्यम्) दृष्टार्थकेषु समन्वितो भवति । एतानि सर्वाणि शास्त्राणि यदुद्दिश्य प्रवृत्तानि प्रायस्तानि दृष्टफलान्येव । अतो दृष्टमुद्दिश्य प्रवृत्तानीमानि शास्त्राणि प्रायः नियमविधिपर्यवसायीन्येव भवन्ति । क्वचित् सति सम्भवे तेष्वपूर्वविधित्वं कल्पितमित्यन्यदेतत् । अत एव दृष्टार्थमुद्दिश्य ऋषिभिः प्रोक्तेष्वर्थव्यवहारादिशास्त्रादिषु वक्तृतात्पर्यानुरोधेन वाक्यभेदादीनां दोषत्वं न स्वीक्रियते । तदेतत् सर्वं प्रपञ्चितं व्यवहारप्रकाशे व्यवहारदर्शनविधौ । तस्मादयमत्र निष्कर्षः । उत्सर्गापवादादिमूलभूतान्वयव्यतिरेकादिन्यायमूलकता यत्र सम्भवति तादृशव्यवहारशास्त्रस्य सर्वस्य न वेदमूलकता कल्प्यते । यदंशे तदसम्भवस्तत्रादृष्टार्थकतया वेद एव मूलं कल्प्यते । वास्तुसामुद्रिकादिविधिषु ज्योतिःशास्त्रायुर्वेदप्रमाणव्यवस्थापनक्रमप्रसंगेणाचार्यैः स्मृत्यधिकरणे व्यक्तमेवैतत् प्रपञ्चितम् ।

---

२। श्लोकवार्त्तिकग्रन्थो द्रष्टव्यः

प्रायशः स्वीकृते चार्थशास्त्रादिविधीनां नियमविधित्वे न्यायसञ्चारणेन महावाक्यार्थतात्पर्यं शास्त्रसम्मतत्वं च कथमुन्नीयतेति उच्यते।

नियमविधयो दृष्टार्थकविधिस्थले भवतीति स्वीकृतम्, नियमबलादितरव्यावृत्तिरप्यर्थादेव सिद्धा। यथा व्रीहीनवहन्तीत्यादौ तण्डुलस्य निष्पत्तये वितुषीकरणोद्देशेन प्रवृत्तोऽयं विधिरिदं कार्यमवघातेनैव कर्त्तव्यमिति नियमे पर्यवस्यति। नियमातिक्रमे प्रत्यवायोऽपि। परन्तूद्देशस्य हानौ नियमं परित्यज्य यथा वा नखविदलनेन वितुषीकरणं क्रियते। उद्देश्यसिद्धये निषिद्धस्याप्यङ्गानां सर्वथा विलोपे सम्भवति ग्रहणं क्रियते। तद् यथा—

व्रीहीनवहन्तीति शास्त्रेणावघाताभावाभावरूपो नियम उक्तः। स चानुष्ठितोऽपि, परन्त्वनुष्ठितेऽपि तस्मिन्नेको वा द्वौ वा व्रीही सतुषाववशिष्टौ। तदानीमवशिष्टस्य तस्यावयवविभागरक्षणपुरःसरं वितुषीकरणमवघातेनाशक्यं तदा नखविदलनमपि कर्तुं मीमांसकैरनुमतम्। तथैव प्रधानलोपे निषिद्धस्यापि ग्रहणं क्रियते, इत्यत्रोदाहरणम्।

"अयज्ञिया इत्यर्हार्थप्रयत्नेन साधनत्वमात्रनिषेधाद् विशेषविहितातिरिक्तस्थले सर्वत्रैव भाषादिप्रतिषेधप्रतीतेर्न प्रतिनिधेया द्रव्यसामान्याभावे तु ग्राह्या एवेति ध्येयम्। अत्र च लक्षणया यज्ञोद्देशेन माषनिषेधविधानान्नेकप्रसृताभङ्गः।"१

'अयज्ञिया वै माषाः' इत्युक्त्या हविर्द्रव्येषु माषा निषिद्धाः। व्रीहियवा वा ग्राह्यत्वेन नोक्तास्तथापि यस्मिन् देशे यस्मिन् समये वा व्रीहियवानामनुपलब्धिस्तत्रानिषिद्धेन माषातिरिक्तेन धान्येन हूयते। यदि कदाचिन्माषातिरिक्तं धान्यमपि सर्वथानुपलब्धं भवति होमश्चावश्यं कर्त्तव्यः स तु विलोपयितुं न शक्यते। एवं स्थिते निषिद्धैरपि माषैर्होमः कर्त्तव्य एव भवति। अग्निहोत्रस्य विलोपस्तु न भवति। एवं चात्रोभयत्रापि स्थले मीमांसकैर्न्यायमाश्रित्य यो यो निर्णयः कृतः स शास्त्रसम्मतो वेदमूलकश्चेत्यस्ति वैदिकसमाचारः। तथैव नीतिशास्त्रविषयेऽपि बोध्यम्। अस्य हि मुख्यमुद्देश्यमात्मनि विश्वासं दृढतरं चिरस्थायिनमुत्पाद्य लोकानुरागपुरःसरं पृथिव्या लाभपालनं च निपिद्धम्। तत्र पूर्वाचार्यैर्निर्दिष्टा ये विधयस्ते प्रायः नियमविधित्वे पर्यवसितास्तेषां स्वीकरणे यत्र व्रीहितण्डुलस्यावघाते कृते विनाशवद् यदि प्रजापालनात्मको-

१। भाट्टदीपिका, ६।३, पृः ७१५

द्देशस्य विनाशः प्रसक्तो भवति। तदा तत् सूक्ष्मतमत्वं परिज्ञायैकाग्रभूमिकायां स्थितेनोपरिवुद्धिना ऐश्वर्यादिसम्पन्नेन पूर्वाचार्योदाहृतनियमानतिक्रम्यापि अन्यद्विहितं पूर्वाचार्याणां सम्मतत्वाद् वेदमूलकमेवेति युक्तमुत्पश्याम:।

एवं रीत्या कौटिल्येनोक्तः स्वीयसम्मतोऽर्थः शब्दप्रमाणमूलभूतः सन् प्रत्यक्षानुमानप्रमितो भवतीत्यपि नीतिलक्षणसंगमनाय चिन्तनीयमेव। तत्तु तत्र तत्र प्रसंगे स्वयं मूलकृतैवोपस्थापितमित्यलमतिविस्तरेण।

विषयप्रयोजनसम्बन्धाधिकारिणो मूलस्थेन पृथिव्या लाभे पालने चेति वाक्येन निरूपिता भवन्तीति। नीतिशास्त्रस्याध्ययनीयत्वमत्यन्तमभ्यर्हितम्। तच्चिन्तनाभावे महान् त्रिवर्गसमृद्धिलोपः स्यात्।

साम्प्रतं केषुचन शोधनिवन्धेषु नीतिशास्त्रमवलम्ब्य यद् यदालोचनं दृश्यते तत् तत् तु प्रायशो न प्रमाणपदवीमवगाहते। अत्रास्माकमाशयस्तु ईदृक् :—

(१) अत्र केचिदाहुः, धर्मस्यालौकिकत्वात्तदभिधायकं शास्त्रमर्थस्योपाय-पूर्वकत्वादुपायस्य शास्त्रपूर्वकत्वायुक्तं तदर्थं वार्ताशास्त्रम्।

(२) नीतिशास्त्रं तु न युक्तं यतो नीतिशास्त्रमनर्थकमिति।

(३) प्रत्यक्षानुमानागमप्रमाणदेशकालशक्तिपुरस्सरार्थं साधनविनियोगलक्षणां क्रिया नीतिः।

(४) दृश्यते नीतिं विना पशूनां तत्कल्पानां च वालानामात्महिततृणस्तन्या-हारादिप्रवृत्तिप्राप्तिरनिमित्ता।

(५) तथा अनधीतशास्त्राणामपि म्लेच्छादीनां जलारण्यान्तरिक्षवर्त्तिमीन-मृगपक्षिवन्धनार्थं साधनविनियोगलक्षणा नीतिः।

(६) शीतोष्णवातवर्षादिपरिहाराश्च फलम्।

(७) तथा शास्त्रविदां तुल्येऽपि शास्त्रे केषाञ्चिदर्थेन योगः केषाञ्चिदनर्थेन।

(८) अत्रोच्यते—

(९) नीतेर्विना फलं नास्ति शास्त्रेणैकान्तिको नयः।
शास्त्रे सत्यपि नावश्यमितिसर्वेष्वदः समम्॥ इति।

(१०) पशवो हि मनुष्यप्रयुक्तैः पाशकूटादिभिरुपहन्यमानाः पाशादिविमोचना-कुशला विनाशं, वालाश्च परिहारानभिज्ञाः सर्पाद्युपद्रवादिकमात्यादयन्तो नीतेर्विना दृश्यन्ते।

(११) अतो नीतेर्विना फलं नास्ति ।

(१२) अनधीतशास्त्राणामपि यदा कदाचिद् हिताहितप्राप्तिपरिवर्जनं तदपि यादृच्छिकीं नीतिमेवासाद्य भवति ।

(१३) सा चैवंविधा नीतिर्घुणाक्षरकल्पत्वादनाकवासा ।

(१४) अपनयबाहुल्या चैते शास्त्रविद्भिरुद्वासी क्रियन्ते ।

(१५) शास्त्रेण तु सम्यक्करणीयवर्द्धनीयविधानादैकान्तिकत्वं नीतेः क्रियते ।

(१६) उपदेशादिष्वप्यसावपरिच्छेदोऽप्येषां यदा भवति तदा प्रामाण्यमन्येभ्य एव ।

(१७) तथा हि—

(१८) उपदेशादनायोगाद्वासनानुगमादपि ।
परयत्नाददृष्टाद्वा सर्वाः सर्वत्र वृत्तयः ॥
इत्येतेषां हिताहितप्राप्तिपरिहारौ ।

(१९) क्वचिन्मात्रादिचरितोपदेशापेक्षया न हीदं कुर्विदं मा कार्षीरिति वाचैव श्रोतॄणां शब्दार्थप्रतिपत्तॄणामुपदेशः, किं तर्हि ? अनुकर्तॄणां नाट्योपदेशवदुपदेशः ।

(२०) कदाचिदनायोगाद् यस्यां प्रवृत्तौ बाध्यन्ते, न च फलं प्राप्नुवन्ति ततो विवृत्यान्यत्र निराबाधं फलं च किञ्चिल्लभमानाः पौनःपुन्येनेदमतो दुःखमन्यथा दुःखं भवतीति तमोबाहुल्येऽपि यच्च यावच्च प्राकाश्यं लभन्ते ।

(२१) कदाचिद्वासनानुगमाच्चानन्तरेषु व्यवहितेषु च जन्मसु दर्शनश्रवणादिभिः सर्वस्वभावपरिच्छेदानुभूतलोकत्रयाणां यदृच्छोत्पन्नवासनाप्रबोधानां हिताहितवस्तुन्यभिलाषेतरौ भवतः ।

(२२) ततश्चाभिप्रेतलाभः परिहारश्च ।

(२३) कदाचित् परप्रयत्नादुपकरणसम्पदायत्तमात्मोपकारं मन्यमानो गोवत्सादिवदनं मातुरूधःप्रदेशे योजयन् स्वार्थं साधयति ।

(२४) सान्येषां च परनीत्यपेक्षया प्रवृत्तिः साफल्यं लभते ।

(२५) कदाचिददृष्टात् पूर्वदेहोत्पन्नौ धर्माधर्मौ प्रत्युत्पन्नपरिपाकौ देहकारणानां सन्निवेशविशेषरचनाया कारणीभवतः ।

(२६) एवमिष्टानिष्टप्राप्तिपरिहारनिमित्तप्रवृत्तिविशेषायानन्त्यायपुरुषतर्कागोचरायतावेव प्रभवतः।

(२७) इति न किञ्चिदनिमित्तं फलमस्ति।

(२८) येषामपि शास्त्रविदां केषाञ्चिदपनयादनर्थेन योगः स तेषामपराधो न शास्त्रस्य।

(२९) नोलूकः पश्यतीत्यादित्येन नोदेतव्यम् ?

(३०) प्रतिपत्त्यपराधाच्च शास्त्रानर्थक्यं सर्वशास्त्रेषु तुल्यम्।

(३१) स्वर्गारोग्यापवर्गेष्वर्थेषु शास्त्रेषु च न सर्वे तद्विदो धर्माधर्मसेवापरिहारयोः पथ्यापथ्याहारसेवासेवयोः रागादिहानौ तत्त्वज्ञाने चाभिनिविशमाना दृश्यन्ते।

(३२) ये तदर्थिनो भक्तिश्रद्धान्वितास्तेऽपि शास्त्राणां प्रयोजनहेतव इत्यन्यशास्त्रवदिदमप्यादरणीयमिति।

अत्र ह्यादिमैः सप्तभिर्वाक्यैर्नीतिशास्त्रस्य वैयर्थ्यमाशङ्क्योपरितनैर्वाक्यैर्भक्तिश्रद्धापूर्वकं तस्यादरणीयत्वं व्यवस्थाप्यते। आशंकाग्रन्थे सप्तवाक्यात्मके धर्मशास्त्राणामर्थशास्त्रान्तर्गतवार्ताशास्त्राणां चावश्यकत्वं प्रथमवाक्येनैव निर्धार्य स्वीकृतम्।

उपरितनैः षड्भिस्तत्रत्यैर्वाक्यैर्नीतिशास्त्रस्य निष्प्रयोजनत्वमुपक्षिप्यते इति स्पष्टमेव। अतो निश्चयेनैतद् वक्तुं शक्यते यल्लौकिकेष्वेवार्थेषु शब्दात्मकस्यास्य शास्त्रस्य समाधानग्रन्थस्थैः पञ्चविंशतिवाक्यैरावश्यकत्वं स्थिरीकृतम्। एतेषु वाक्येषु प्रथमवाक्येन धर्मशास्त्रवार्ताशास्त्रयोरावश्यकत्वे स्थिरीकृते नीतिशास्त्रस्यानर्थक्यं शङ्कनं द्वितीयवाक्यस्य विषयः। उपरितनैः पञ्चभिर्वाक्यैर्निष्प्रयोजनत्वमेतत् स्फुटीक्रियते। नीतेः शास्त्रसम्मतं स्वरूपमनिर्धार्य तत्र निष्प्रयोजनतायाः साधयितुमशक्यत्वात्तृतीयवाक्येन प्रथमतस्तत्स्वरूपमनूदितम्। चतुर्थपञ्चमाभ्यां वाक्याभ्यामेवं लक्षणीयाया नीतेरनावश्यकता, षष्ठेन वाक्येन नीतेरावश्यकत्वेऽपि म्लेच्छदृष्टान्तेन तत्र शास्त्रस्यनावश्यकत्वं सप्तमेन तु शास्त्रसत्त्वेऽपि तस्य वैयर्थ्यमाशङ्कितम्। अत एवास्य शङ्कात्रयस्य यथाक्रममुत्तरम्।

(१) नीतेर्विना फलं नास्ति।

(२) शास्त्रेणैकान्तिको नयः ।

(३) शास्त्रे सत्यपि नावश्यमिति सर्वेष्वदः समम् ।

इति त्रिखण्डात्मकेन नवमेन वाक्येन भविष्यतीति शङ्का ग्रन्थस्य सर्वस्यापि शङ्कात्रय एव तात्पर्यमिति न विवादः ।

अत्र म्लेच्छराजनीतिप्रचारवत्यधुनातनसमये नीतिशक्तिं विनापि जीवनं भविष्यतीति शङ्काया अनुत्थितिरेव । अतो दशमैकादशवाक्याभ्यां यदुक्तं जयमङ्गलाकृता तद्विषये वक्तव्यस्य नास्त्यावश्यकतेति प्रथमपूर्वपक्षोऽनुत्थानपराहतः । द्वादशवाक्यमवलम्ब्य च शिष्टान्येकविंशतिवाक्यान्यालोचनीयतामर्हन्ति ।

"अनधीतशास्त्राणामपि यत् कदाचिद् हिताहितप्राप्तिवर्जनं तदपि यादृच्छिकीं नीतिमेवासाद्य भवतीदं वाक्यं यादृच्छिकपदघटितत्वात् कदाचिद्वासनानुगमाच्चानन्तरेषु व्यवहितेषु च जन्मसु सर्वपदार्थस्वभावपरिच्छेदानुभूतलोकत्रयाणां यदृच्छोत्पन्नवासनाप्रबोधानां हिताहितवस्तुन्यभिलाषेतारौ भवतः" इत्येकविंशतितमेन वाक्येन स्फुटीक्रियते ।

स्वभावमीश्वरं कालं यदृच्छां नियतिं तथा ।
परिणामं च मन्यन्ते प्रकृतिं पृथुदर्शिनः ॥[१]

इति सुश्रुतग्रन्थोपरि व्याख्याकर्त्रा डल्हणेन—

"यदृच्छा पुनरलक्षित आकस्मिकपदार्थाविर्भावः स्वभावस्तावत् सत्त्वरजस्तमसां तद्विकाराणां पृथिव्यादिमहाभूतानां च परिणामस्य तादृशो विशेषः" इति व्याख्यानाद् यदृच्छास्वभावशब्दार्थौ स्फुटीभवतः । एवं चालक्षिताकस्मिकपदार्थाविर्भावोद्बुद्धवासनानामित्यर्थो यदृच्छोत्पन्नवासनाप्रबोधानामित्यंशस्य भवति । वक्ष्यमाणगोकुलनाथोपाध्यायोक्त्यनुसारेण संस्कारविशेषरूपायाः शक्तेः पुरस्कारेण जायमाना नीतिर्यदृच्छोत्पन्नवासनाप्रबोधप्रयुक्ता षष्ठे वाक्ये यादृच्छिकीपदेनोच्यते । अत्र वासनोद्बोधकस्यालक्षितत्वलाभात् सर्वत्र शरणीकरणीयतानर्हत्वं प्रतिपाद्यन्ते । तथा विधाप्युद्बुद्धा वासना पूर्वस्मिन्नपि जन्मनि शास्त्राधीनसर्वपदार्थस्वभावपरिच्छेदानुभूतलोकयात्राणामेव भवतीति परम्परया शास्त्राधीनत्वमेव तस्या व्यवस्थाप्यते । युक्तश्चायमर्थः प्रतिभाति । विशे

१। सुश्रुतसंहिता, पृः ११८, ३१।२१

वाक्ये ह्यन्वयव्यतिरेकैकशरणानां लब्धस्य ज्ञानस्य बाध्यमानत्वमुपपाद्याधीत-शास्त्राणामेव यच्च यावच्च प्राकाश्यं लभते इत्युपपादितम् ।" व्याकरणशास्त्रा-ध्ययनेनैव सम्पूर्णं संस्कृतभाषाज्ञानं संस्कृतत्वादिजातिरभिव्यक्तिश्च भवतीति दृष्टान्तेनास्माभिरप्यनुभूयते च । नव्यप्रणाल्या तत्तज्जन्मनि जायमानवासनो-द्वोधस्य एतज्जन्मान्वयव्यतिरेकप्रयोगमूलकत्वेऽप्युपगम्यमाने कीटदष्टं फलं मधुरमेव भवतीति सर्वसम्मतः सिद्धान्तो भज्येत। इदमेव तत्त्वं 'शास्त्रेणैकान्तिको नय' इति पद्यांशेनाविष्कृतं ग्रन्थकृता, तथा च शास्त्रानभ्युपगमे अलक्षित-निमित्तत्वाद्वासनोद्बोधो वा शरणीकरणीयः, अन्वयव्यतिरेकाख्यतर्क एव वा पूर्वोक्तबाधासहकृतः शरणीकरणीयः । उभयथाप्यनधीतव्याकरणशास्त्राणां यच्च यावच्च संस्कृतं न प्राकाश्यं लभते न्यूनाधिकसंख्याव्यवच्छेदपुरस्सरं साधु-त्वाभिव्यक्तिश्च न भवतीति वयमनुभवामः । सम्पूर्णाया राजनीतेर्यच्च यावच्च प्राकाश्यं सर्वं वाङ्मयं विना न सम्भवतीति किमु वक्तव्यम् ? अतो नीतिलक्षणे आगमप्रमाणमावश्यकमिति सिद्धान्तितं जयमङ्गलाकृता ।

> न स शब्दो न तद्वाच्यं न स न्यायो न सा कला ।
> जायते यन्न काव्याङ्गमहो भारो महान् कवेः ।।१

इति साहित्यमीमांसायाम् ।

> सर्वरीतिरसैर्जुष्टं पुष्टं गुणविभूषणैः ।
> अत एव महाकाव्यं तत्कर्ता च महाकविः ।।२

इत्यग्निपुराणे च स्मरणात् प्रोक्तस्य शक्तिपदार्थस्य लाभाय दर्शनश्रवणादिभिः सर्वपदार्थस्वभावपरिच्छेदानुभूतलोकमात्रत्वमनन्तरेषु व्यवहितेषु वा जन्मसु यस्य तस्यैव तादृशवासनोद्बोध इत्येकविंशतितमे वाक्येऽर्थः पर्यवसितो भवति । तदर्थं शास्त्राध्ययनाधीन ऐकान्तिको निश्चयो भक्तिश्रद्धापुरस्सरं सम्पादनीय इति द्वात्रिंशवाक्यस्य तात्पर्यम् । ननु जयमङ्गलाकृन्मते नीतेर्लक्षणं प्रत्यक्षानु-मानागमप्रमाणदेशकालपुरस्सरोऽर्थविनियोगलक्षणा क्रिया नीतिरित्युक्तं तत्र शक्तिस्वरूपं कीदृक् ? इति चेत्तत्र इत्थं निवेदनीयम् ।

शक्तिपदनिवेशात्मकस्यार्थदृष्ट्या महद् गौरवं वर्त्तते । अर्थशास्त्र एव

१ । भामह, काव्यालंकार, ५।४
२ । अग्निपुराण, ३३७।२२

नवमाधिकरणे प्रथमाध्याये प्रथमसूत्रे "शक्तिदेशकालबलाबले"[१]इत्येवं पठितमतो देशकालशक्तीनां विचारो नीतौ परमावश्यक इति व्यक्तम्। सोऽयमावश्यको विषय उपाध्यायानिरपेक्षः कृत इति देशकालानुकूल्ये सतीति भागे व्यक्ततया स्थितेऽपि जयमंगलाकारेण स्फुटं निर्दिस्टः स्वयं कृते लक्षणे।

शक्तौ सत्यां साधनविनियोगः स्वयमेव भवति, अतः स न प्राधान्येन नीतिशास्त्रस्य विषयः। किन्तु शक्तिसाधनमेवेति जयमंगलाकृतोऽभिप्रायोऽत्र स्फुटः।

रुद्रहीनं विष्णुहीनं न वदन्ति नराधमम्।
शक्तिहीनस्तु यो मर्त्यस्तं वदन्ति नराधमम्॥

इति वचनानुसारेण शक्तेः समुपार्जनं तस्या यथावद्विनियोगश्च नीतिशास्त्रस्य मुख्यं लक्ष्यमिति स्थिते—

'नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा॥'[२]

इत्यग्निपुराणवचनानुसारेण शक्तेः समुपार्जनविनियोगौ क्वचिदेव पुण्यवतो महापुरुषस्य हस्तगतौ भवतो न सर्वेषाम्।

यद्यपि "शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः" इत्यमरकोशानुसारेणार्थशास्त्रीयनवमाधिकरणाध्यायोक्तप्रकरणे च प्रभावमन्त्रोत्साहशक्तय एवात्र विवक्षितास्तथापि प्रभावादीनां स्वरूपनिर्धारणे किञ्चिद्वैलक्षण्यमवश्यमालोचनीयतामर्हति।

नयचन्द्रिकाकारेण हि "उत्साहः शौर्यादिमत्त्वं प्रभावः क्रोधादिमत्त्वं मन्त्रस्य विचारपूर्वककार्यनिश्चयस्ये"ति व्याख्यानं कृतम्। तथाप्यमरकोशे प्रभावोत्साहमन्त्रजा इति तज्जन्यत्वं निर्दिश्यत इत्यस्यैव क्वचिदत्र विशेष आलोचनीयः, तथा हि भावप्रकाशने—

परमात्मा सर्ववस्तुपरिस्पन्दप्रवर्तकः।
ज्ञानप्रभा च सानन्दा तस्याः सत्त्वं प्रजायते॥
क्रियाप्रभा रजः सत्त्वाच्छक्तिः स्यादुत्तमा प्रसूः॥[३] इति।

---

१। अर्थशास्त्र, ९।१
२। साहित्यदर्पणोद्धृतं वचनम्, साहित्यदर्पण १
३। भावप्रकाशन, २, पृः ४१, १७-१८

इत्यनेन हि सर्वान्तर्यामिपरमात्मप्रभावान्वयमिश्रणस्य शक्तिरूपत्वमुच्यते।

"स न्यस्तचिह्नामपि राजलक्ष्मीं तेजो विशेषानुमितां दधानः।
आसीदनाविष्कृतदानराजिरन्तर्मदाविष्ट इव द्विपेन्द्रः ॥"[१]

इति कालिदासोऽपि तादृशं प्रभाविशेषं राजशरीरे सम्मनुते। तदेव तेन कोशदण्डादिमत्त्वमिति पदेन मतुप्प्रत्ययोत्तर-त्व-प्रत्ययवाच्येन नयचन्द्रिकाकारः प्रतिपादयति। अन्यथा कोशदण्डादि इत्येव ब्रूयात्। "सा सत्ता सा महानात्मा तामाहुस्त्वतलादयः" इति वदन्तो वैयाकरणा अपि तदेव तेजस्त्वतलादिशब्दवाच्यमिति प्रतिपादयन्ति।

"मनसि सदा सुसमाधिनि विस्फुरणमनेकधाभिधेयस्य।
अक्लिष्टपदानि च विभान्ति यस्यामसौ शक्तिः ॥"

इति साहित्यशास्त्रविद्भिर्वर्ण्यमानं शक्तितत्त्वमेतादृशः प्रकारविशेष एव यम् "शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्"[२] इत्यादिना काव्यप्रकाशकारो व्याजहार।

अत्रावेक्षणादिति व्याचष्टे विमर्शनादिति। विमर्शनमनुषङ्गपौनःपुन्यम्। निपुणतापदार्थं व्याचष्टे व्युत्पत्तिरिति। तत्तदर्थगोचरो दृढतरसंस्कारस्तत्तद्वाक्यार्थप्रतिसन्धानं वेत्यर्थः। स्रग्धरावृत्तत्वावच्छेदेनादौ गुरुचतुष्कत्वमिति संस्कारदार्ढ्यं व्युत्पत्तिः। "सानन्दं नन्दिहस्ते"इत्यादौ तत्तदानुपूर्वीकपदगोचरसंस्कारः शक्तिरिति विवेकः। एवं शास्त्रान्तरविधेयेष्वपि। प्रणिधेयः सामान्यविशेषभावेन व्युत्पत्तिशक्तिविधेययोर्भेद इति गोकुलनाथोपाध्यायकृतकाव्यप्रकाशविवरणमवधेयम्।

"आदौ शास्त्रान्धकारे पतित इव ततोऽभ्यासमार्गं चरिष्णुः।
पश्चाद्व्युत्पत्तिदेहल्युपगत इति नः शक्तिवाटी प्रविष्टः ॥
नानाशब्दाढ्यपुष्पावचयकरणतो वाग्वशीभूतविश्वो।
यत् प्रेमापाङ्गदृष्ट्या भवति कविवरो भारती सा पुनातु ॥"

इति वशिष्ठस्मृतिटीकामङ्गलपद्येऽन्धकारमयाच्छास्त्रावरणात्तृतीयां व्युत्पत्तिकक्षा-

---

१। रघुवंश, २।७
२। काव्यप्रकाश, प्रथम उल्लास, कारिका ३

मतीत्य लब्धो वाटिकाविशेषरूपः संस्कारविशेष एव शक्तितत्त्वमिति वर्ण्यते। तदेतद् गोकुलनाथोपाध्यायोक्तरीत्या सामान्यकाविशेषगोचरोद्वुद्धसंस्कारयोर्व्युत्पत्तिशक्तिरूपत्वे घटते। विशेषतः शक्तिरूपस्योद्बुद्धसंस्कारस्य प्रकाशमयत्वं वाटिकारूपेण स्फुटीभवति संस्काराणां प्रत्यक्षज्ञानजनकत्वस्य तद्ग्रन्थादेवावगमात्।

पूर्वोक्तपद्ये शास्त्रान्धकार इत्युपक्रमादुत्तरोत्तरं सूक्ष्मतरसूक्ष्मस्फुटप्रकाशलाभस्तु विषमास्ववस्थासु लभ्यते। सामान्यविशेषप्रकाशयोर्भेदस्तु न्यायमञ्जरीकारेणेदं माघपद्यमुदाहृत्य वर्णितः।

"चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम्।
विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यवोधि सः॥"[१]

इति। रामायणाद्युपवर्णितेषु रामरावणादिपदेषु यद्रामत्वरावणत्वादिकं प्रकाशते तद्धि उदात्तनायकत्वादिरूपं सामान्यप्रकाशरूपमेव भवत्याधुनिकतमानामपि।

यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्॥[२]

इति गीतापद्ये भास्वररूपविशिष्टो यस्तेजोविशेष उपास्यतया प्रतिपाद्यते सः

"अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः"[३]

इत्यादिगीतावाक्येनेश्वररूपतया वर्ण्यते। स वह्निर्घटपटादिवद्वाच्यजातिरूपः। स च—

"समानोऽग्निसमीपस्थः कोष्ठे चरति सर्वदा।
अन्नं गृह्णाति पचति विवेचयति मुञ्चति॥[४]

इति भावप्रकाशनोक्तरीत्या विद्युत्समूहमयत्वात्तत्ज्जातीयव्यक्तीनामनन्तानां सृष्टिजनकः। एकः सूर्य इवासंख्येषु दर्पणादिषूपाधिष्वनन्तानां सूर्यप्रतिविम्वानां जनकः।

सर्वदा सर्वभावानां सामान्यं वृद्धिकारणम्।
ह्रासहेतुर्विशेषश्च प्रवृत्तिरुभयस्य च॥
सामान्यमेकत्वकरं विशेषस्तु पृथक्त्वकृत्।[५]

इति चरकसंहितोक्तवैद्यकसिद्धान्तसिद्धः।

---

१। शिशुपालवध, १।३
२। श्रीमद्भगवद्गीता, १५।१२
३। श्रीमद्भगवद्गीता, १५।१४
४। भावप्रकाशन, ७, पृः १८४, ४-५
५। चरकसंहिता, १७।४२-४३

'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकधोऽनुगच्छन् । उपाधिना-क्रियते भेदरूप' इत्यादिश्रुत्या ज्ञायतो प्राज्ञतैजसो विश्वात्मकेषु स्वप्नदशायां पित्ताख्यतेजः प्रचुरत्वादात्मप्रकाशमयत्वाद् वा तेजस इति वेदान्तशास्त्रे व्यपदिश्यते च । विद्युत्कणैरेव सर्वजगत्सृष्टिजातेति वदद्भिराधुनिकैर्वैज्ञानिकैरपिनिर्विवादं प्रत्यक्षीक्रियत एव ।

"एकोऽहं बहु स्यां प्रजायेय[१]" इति श्रुत्या जगन्मूलप्रकृतिभूतेयं शक्तिः स्वतन्त्रचेतननिष्ठेति पौराणिकसम्प्रदायस्य सिद्धान्तः ।

जड़प्रकृतिनिष्ठेति निरीश्वरवादिनां नवीनवैज्ञानिकानाम् । स्वातन्त्र्यमेव चैतन्यं पारतन्त्र्यमेव जड़त्वमित्यनवीनवैज्ञानिकाविरुद्धप्रत्यभिज्ञादर्शनोक्त-जड़चेतनलक्षणानुसारेण तु तस्याश्चेतननिष्ठत्वमिति पौराणिकसिद्धान्त एव हृदयावर्जको भवति । अयमेवेच्छाज्ञानक्रियाशक्त्यात्मकसमूह आनन्दरू-पतामपि गच्छति । तथा च यस्यैव पुरुषस्य ज्ञानाधिक्यं क्रियाशक्त्याधिक्यं तदुभयवशेन सफलेच्छता च स एव शक्तिमानुत्तमश्चेति गीयते । इदं शक्त्याधिक्यं जगन्मूलभूतायां प्रकृतावीश्वरे निरवधिकं मन्तुमुचितम् । तदीयानां नियमाना-मनुसरणेनैव मनुष्यजातेरप्यभ्युन्नतिर्भवितुमर्हतीत्यत्र नास्त्येव पौराणिक-नवीनमतयोः कोऽपि भेदः । इयानेव परं विशेषोऽनयोर्मतयोः "यो वै ज्ञातोऽनूचानः स ऋषिः"[२] इति श्रुतिस्मृत्यनुसारेण पूर्वशास्त्रानुसरणमुन्नते-र्बीजमिति पौराणिका वदन्ति । पूर्वयुगमज्ञानबहुलमुत्तरोत्तरं प्रज्ञा विवृधिपु-र्भविष्यति कस्मिंश्चिदागामिनि काले प्रयोगोपलब्धज्ञानानां सर्वज्ञतेति नवीनमतम् । एतादृशनवीनमतानुसारेणैव बौद्धादिभिः पृथक् प्रस्थानेनोपदेशाः प्रणीताः । भारतीयराजनीतिविदां तु प्रथमः पक्ष एव रोचते । तत्र कारणं तु व्याकरण-शास्त्रेणैवं प्रतिपादितं 'रक्षोहागमलघ्वसन्देहाः प्रयोजनमि'[३]ति । त्रिमुनि-व्याकरणेनैव तत्संस्कृताः शब्दाः साधवोऽन्ये त्वसाधवः इत्यसन्दिग्धं लघुनोपायेन संस्कृतभाषास्वरूपं लभ्यते । प्रयोगानुसारिण्या भाषया भाव्यं न तु व्याकरण-

१ । तैत्तिरीयोपनिषत्, २।६

२ । शतपथब्राह्मण, ४।३।४।१६

३ । पतञ्जलि, महाभाष्य, पस्पशाह्निक, पृः ३

नियमस्तत्रोपयुक्त इति नव्यमतानुसारेण तु भाषास्थैर्यं कथमपि संभवति। उत्तरोत्तरभाषाकाले पूर्वपूर्वभाषाज्ञानस्य लुप्यमानत्वात् पूर्वग्रन्थस्थानामर्थानामैतिहासिकानामज्ञानमात्रमेव कारणं स्यान्न तु सर्वज्ञतासम्पत्तये उद्देशभूतायै इति भयेन भारतीयराजनीतिज्ञाः

"शास्त्रदृष्टिर्गुरोर्वाक्यं तृतीयः स्वात्मनिश्चयः"[१]

इत्युक्तप्रकारेण प्रत्यक्षानुमानागमशक्तिदेशकालपुरस्सरार्थसाधनविनियोगलक्षणां क्रियामुन्नतेर्बीजमाहुः। तदेव नीतेः स्वरूपं धर्मस्य सुन्दरतमं स्वरूपम्। एतादृशशक्तिसम्पत्तिः सरस्वत्युपासकानामेव सम्भवति। अन्येषां तु प्रयोगानुसारिणीशक्तिरुद्देश्यविपरीतत्वाद्विसंवादिनी न हि विस्रम्भनीयतामर्हतीति भारतीयराजनीतिविदां सिद्धान्तः।

युक्तश्चायं व्यक्तिविषये कार्ये प्रयोगद्वारा सिद्धान्तान्वेषणे क्रियमाणेऽसफलप्रयोगैः पूर्वभाविभिर्नाशो व्यक्तिभागस्य स्यादितीतरत्रविषये तथा प्रयोगमार्गानुसरणे कदाचिदनुज्ञानार्हत्वेऽपि सर्वजनविषये राजनीतिः प्रयोगे तथा मार्गानुसरणे सिद्धान्तान्वीक्षणात् प्रागेव सर्वराष्ट्रनाशः प्रसज्येतेत्यनर्थायैव स्यात्। तस्मात्—

मतिभेदतमस्तिरोहिते
गहने कृत्यविधौ विवेकिनाम्।
सुकृतः परिशुद्ध आगमः
कुरुते दीप इवार्थदर्शनम्॥[२]

इति पन्था एव भद्र इति भारतीयराजनीतिर्मन्यते।

अयं च सिद्धान्तः पूर्वोत्तरपक्षमुखेन पूर्वोद्धृतवाक्यैर्जयमङ्गलाकृता स्थिरीकृतः। एतेन लेखेनानन्दप्रभामिश्रिता ज्ञानप्रभा एव शक्तितत्त्वं भवतीति पर्यवसितम्। तथा च नीतिर्धर्मस्य सुन्दरतमं स्वरूपमिति निर्णीतम्। तथा सत्त्वस्य सुन्दरतमं स्वरूपमुक्तज्ञानप्रभैव। अत्रेदमप्यनुसन्धेयम् यद् विनायोगसम्बन्धमीशसमवेतज्ञानप्रभा पूर्णतयास्मासु भानविषयो न भवति। आनन्दप्रभामिश्रणं च ज्ञानप्रभायां नीतिमार्गानुसारेणैव स्फुटीभवति नास्त्यत्र सन्देहः।

---

१। कामन्दकीयनीतिसार, तुलनीय, ४।११

२। भारवि, किरातार्जुनीय, २।३३

प्रसङ्गेऽस्मिन् अधिकरणप्रकरणयोरभेदोऽपि पर्यालोचनीयः, वस्तुतस्तु अधिकरणं न हि प्रकरणादन्यत्, अपि तु प्रकरणसमूह एव। तदुक्तं सिद्धान्तशिरोमणिटीकायां त्रिप्रश्नाधिकरणे 'अधिकतरमधिक्रियन्ते गणितादीनि यत्रासावधिकारस्तं प्रकृतार्थजिज्ञासाप्रयोजकतात्पर्याधिकरणीभूतो ग्रन्थैकदेश इति यावत्। प्रकृतत्वं च उद्देशविषयतात्पर्याधिकरणत्वम्, सप्रकरमधिकरणमित्यर्थः।

# ग्रन्थपञ्जी

**Texts of the Vedic and Sanskrit Literature**

अग्निपुराणम्—पञ्चाननतर्करत्नेन सम्पादितम्, वङ्गवासी प्रेस, कलिकाता, वि. एस, १३१४

अभिधानचिन्तामणिः—कालिवरशर्मणा रामदास सेनेन च सम्पादितम्, कलिकाता, सम्वत्, १९३४

अर्थशास्त्रम् (कौटिल्यविरचितम्)—आर. श्यामशास्त्रिणा सम्पादितम्, महीशूर, १९२४

" " —जे. जलि तथा आर. स्मिथ इत्याभ्यां सम्पादितम्, लाहोर, १९२३-२४

" " —टि. गणपतिशास्त्रिणा त्रिषु अंशेषु सम्पादितम्, त्रिवान्द्राम, १९२४-२५

" " —जि. हरिहरशास्त्रिणा सम्पादितम्, माद्राज, १९५८

" " —रामतेजशास्त्रिपाण्डेयेन सम्पादितम्, काशी, १९५९

" " —गङ्गाप्रसादशास्त्रिणा सम्पादितम्, मुजाफ्फरनगर, सम्वत् २०१०

" " —आर. पि. काङ्गले इत्यनेन सम्पादितम्, प्रथमः खण्डः, वम्बे, १९६०

" " —आर. जि. वसाकेन सम्पादितम्, कलिकाता, १९६४

अष्टाध्यायिसूत्रम् ( पाणिनिकृतम् )—श्रीशचन्द्रवसुना सम्पादितम् दिल्ली, १९६२

आपस्तम्बधर्मसूत्रम्—ए. चिन्नस्वामिशास्त्रिणा ए. रमानाथशास्त्रिणा च सम्पादितम्, वाराणसी, १९३२

ऐतरेयब्राह्मणम्—अनन्तकृष्णशास्त्रिणा सम्पादितम्, त्रिवान्द्राम, १९४२
ऋक्‌वेदः—राजाराम शास्त्री वोदास् इत्यनेन शिवराम शास्त्री गोड इत्यनेन च सम्पादितम्, वम्बे, शक, १८१०
कामसूत्रम्—पञ्चाननतर्करत्नेन सम्पादितम्, वङ्गवासी प्रेस, कलिकाता, वि. एस, १३३४
काव्यप्रकाशः (मम्मटकृतः)—शिवप्रसादभट्टाचार्येण सम्पादितम्, कलिकाता संस्कृत कलेज, १९५९
काव्यमीमांसा (राजशेखरकृता)—मधुसूदनमिश्रेण सम्पादितम्, वाराणसी, १९३१
काव्यालंकारः (भामहकृतः)—डि. टि. ताताचारिया शिरोमणिना सम्पादितम्, तिरुपति, १९३४
किरातार्जुनीयम्—पण्डितदुर्गाप्रसादेन सम्पादितम्, निर्णयसागर प्रेस, वम्बे, शक, १८१७
कुमारसम्भवम्—नारायणराम आचार्येण सम्पादितम्, निर्णयसागर प्रेस, वम्बे, १९५५
चरकसंहिता—श्री गुलाव कुनभेर्वं आयुर्वेदिक सोसाइटि, जामनगर, १९४९
छान्दोग्योपनिषद—दुर्गाचरणसांख्यवेदान्ततीर्थेन सम्पादितम्, कलिकाता, वि. एस, १३२१
ताण्ड्यब्राह्मणम्—हरिनारायण आप्तेन सम्पादितम्, आनन्दाश्रम संस्कृत सिरीज, पुना, १८९९
तैत्तिरीयब्राह्मणम्—हरिनारायण आप्तेन सम्पादितम्, आनन्दाश्रम संस्कृत सिरीज, पुना, १८९८
तैत्तिरीयोपनिषद—दुर्गाचरणसांख्यवेदान्ततीर्थेन सम्पादितम्, कलिकाता, वि. एस, १३२१
त्रिकाण्डशेषः—श्रीवासकन्ध महानायकलिवरेण सम्पादितम्, वम्वे, सम्वत्, १९७२
दशकुमारचरितम्—एम्. आर. कले इत्यनेन सम्पादितम्, मोतीलाल बनारसीदास, दिल्ली, १९६६
दीघनिकायः—एन्. के. भगवतेन सम्पादितम्, वम्वे, १९३६

देवीपुराणम्—पञ्चाननतर्करत्नेन सम्पादितम्, वङ्गवासी प्रेस, कलिकाता, वि. एस, १३३४

धर्मशास्त्रसंग्रहः—जीवानन्दविद्यासागरेण सम्पादितम् प्रकाशितम् च, कलिकाता, १८७६

नाट्यशास्त्रम् (भरतप्रणीतम्)—वटुकनाथशर्मणा वलदेवोपाध्यायेन सम्पादितम्, काशी संस्कृत सिरीज, वाराणसी, १९२९

नीतिप्रकाशः (वैशम्पायनकृतः)—गुस्ताव ओपार्ट इत्यनेन सम्पादितम्, १९७०

नीतिसारः (कामन्दककृतः)—खेमराजश्रीकृष्णदासेन सम्पादितम्, वेङ्कटेश्वर प्रेस, वम्वे, सम्वत्, २००९

न्यायकन्दली—गङ्गानाथ झा इत्यनेन सम्पादितम्, वेनारस, १९१६

न्यायकुसुमाञ्जलिः—लक्षणशास्त्री द्रविड़ेन विन्ध्येश्वरीप्रसाद द्विवेदिना सम्पादितम्, एसियाटिक सोसाइटि, कलिकाता, १९११

न्यायवार्त्तिकम्—विन्ध्येश्वरीप्रसाद द्विवेदिना सम्पादितम्, चौखम्बा संस्कृत सीरिज, वाराणसी, १९१५

न्यायसूत्रम्—गङ्गानाथ झा इत्यनेन सम्पादितम्, ओरियेण्टाल वुक् एजेन्सी, पुना, १९३९

न्यायसूत्रम् (वात्स्यायनभाष्यम्)—भि. जे. आप्ते इत्यनेन सम्पादितम्, आनन्दाश्रम संस्कृत सीरिज, पुना, १९२२

पञ्चतन्त्रम्—काशीनाथ पाण्डुरङ्ग परव इत्यनेन सम्पादितम्, निर्णयसागर प्रेस, वम्वे, शक, १८२४

पद्मपुराणम्—हरिनारायण आप्ते इत्यनेन सम्पादितम्, आनन्दाश्रम संस्कृत सीरिज, पुना, १८९३

प्रशस्तपादभाष्यम्—विन्ध्येश्वरीप्रसाद द्विवेदिना सम्पादितम्, वाराणसी, १८९५

बृहत्संहिता (वराहमिहिरकृता)—कार्ण इत्यनेन सम्पादितम्, विव्लिओथेका इण्डिका, कलिकाता, १८६८

बृहदारण्यकोपनिषद—वासुदेवलक्षणशास्त्रिणा सम्पादितम्, निर्णयसागर प्रेस, वम्वे, १९१८

भागवतपुराणम्—पञ्चाननतर्करत्नेन सम्पादितम्, वङ्गवासी प्रेस, कलिकाता, वि. एस, १३३४

भावप्रकाशनम्—जेनारेल एडिटर—वि. जे. सन्देसरा, गायकोयार्डस् ओरियेण्टाल सिरीज, ओरियेण्टाल इनस्टिटिउट, वरोदा, १९६८

मत्स्यपुराणम्—पञ्चाननतर्करत्नेन सम्पादितम्, वङ्गवासी प्रेस, कलिकाता, वि. एस. १३१६

मनुसंहिता—गङ्गानाथ झा इत्यनेन सम्पादितम्, एसियाटिक सोसाइटि, कलिकाता, १९३२, १९३९

महाभारतम्—पञ्चाननतर्करत्नेन सम्पादितम्, वङ्गवासी प्रेस, कलिकाता, शक, १८२६-१८३०

महाभाष्यम् (पतञ्जलिकृतम्)—क्षितीशचन्द्र चट्टोपाध्यायेन सम्पादितम्, कलिकाता, १९५७

महावंशः—उइलहेल्म् गाइगार इत्यनेन सम्पादितः, लण्डन, १९१२

मानसोल्लासः—गजानन के. श्रीगण्डेकर इत्यनेन सम्पादितम्, वरोदा, १९२५

मुद्राराक्षसम्—सि. आर. देवधरेण वि. एम. वेदेकरेण सम्पादितम्, वम्वे, १९४८

मृच्छकटिकम्—के. पि. परव इत्यनेन सम्पादितम्, निर्णयसागर प्रेस, वम्वे, १९२२

युक्तिकल्पतरुः (भोजप्रणीतः)—ईश्वरचन्द्रशास्त्रिणा सम्पादितम्, कलिकाता, १९१३

योगसूत्रम् (भोजवृत्तिसह)—महेशचन्द्र पालेन सम्पादितम्, कलिकाता, वि. एस, १३२४

रघुवंशम्—वासुदेवलक्षण शास्त्री पणसीकरेण सम्पादितम्, निर्णयसागर प्रेस, वम्वे, १९२९

रसगङ्गाधरः (जगन्नाथविरचितः)—वद्रीनाथ झा इत्यनेन मदनमोहन झा इत्यनेन च सम्पादितम्, चौखम्बा विद्या-भवन, वाराणसी, १९६४

रामायणम्—पञ्चाननतर्करत्नेन सम्पादितम्, वङ्गवासी प्रेस, कलिकाता

वायुपुराणम्—हरिनारायण आप्ते इत्यनेन सम्पादितम्, आनन्दाश्रम संस्कृत सीरिज, पुना, १९०५

विष्णुपुराणम्—पञ्चाननतर्करत्नेन सम्पादितम्, वङ्गवासी प्रेस, कलिकाता, वि. एस, १३३१

विष्णुसंहिता—टि. गणपतिशास्त्रिणा सम्पादितम्, त्रिवान्द्राम संस्कृत सिरीज, त्रिवान्द्राम, १९२५

वीरमित्रोदयः (मित्रमिश्रकृतः)—विष्णुप्रसादशर्मणा सम्पादितम्, चौखम्बा संस्कृत सिरीज, वाराणसी, १९०९-१९१६

शतपथब्राह्मणम्—ए. ओयेवार इत्यनेन सम्पादितम्, अटो हारासोउइत्ज्, लाइपजिक, १९२४

शिशुपालवधम्—हरगोविन्दशास्त्रिणा सम्पादितम्, चोखम्वा . विद्याभवन, वाराणसी, १९५५

शुक्रनीतिः (शुक्राचार्यकृतः)—क्षेमराज श्रीकृष्णदासेन सम्पादितम्, वेङ्कटेश्वर प्रेस, वम्वे, शकं, १८२९

श्रीमद्भगवद्गीता—प्रमथनाथतर्कभूषणेन सम्पादितम्, कलिकाता, वि. एस, १३५८

सङ्गीतरत्नाकरः (शार्ङ्गदेवप्रणीतः)—एस. सुब्रह्मण्यशास्त्रिणा सम्पादितम्, भल्युम १, एडायार लाइब्रेरी, माद्राज, १९४३

सर्वदर्शनसंग्रहः (माधवाचार्यकृतः)—कृष्णदासात्मजगङ्गाविष्णुना सम्पादितम्, लक्ष्मी वेङ्कटेश्वर प्रेस, वम्वे, शक, १८४७

सांख्यकारिका (ईश्वरकृष्णेन विरचिता वाचस्पतिमिश्रप्रणीतया सांख्यतत्त्व-कौमुद्या सह)—पाण्डुरङ्ग जवजीना सम्पादितम्, निर्णयसागर प्रेस, वम्वे, १९४०

साहित्यदर्पणम् (विश्वनाथप्रणीतम्)—हरिदाससिद्धान्तवागीशेन सम्पादितम्, कलिकाता, शक, १८६७

सुश्रुतसंहिता—जीवानन्दविद्यासागरेण सम्पादितम्, कलिकाता, १८८९

स्वप्नवासवदत्तम् (भासविरचितम्)—सि. आर. देवधरेण सम्पादितम्, ओरि-येण्टाल वुक एजेन्सी, पुना, १९४६

हर्षचरितम् (वाणभट्टकृतम्)—जीवानन्दविद्यासागरेण सम्पादितम्, कलिकाता, १८७६

## MODERN WORKS

अलटेकार ए. एस्.—स्टेट एग्राण्ड गभर्नमेण्ट इन् एनसेण्ट इण्डिया, वेनारस, १९४९
ओपार्ट गुस्तव—अन दि ओयेपन्स्, आर्मि अरग्यानाइजेशन् एण्ड पलिटिक्याल म्याक्सिम अफ् दि हिन्दुस्, १८८०
कङ्गले आर. पि.—दि कौटिल्य अर्थशास्त्र (इंलिश ट्रानश्लेशन), पार्ट. २, वम्वे, १९६३
" —दि कोटिल्य अर्थशास्त्र—ए स्टाडि, वम्वे, १९६३
कयेजी अडोल्फ्—दि लाइफ इन एनसेण्ट इण्डिया, क्यालकाटा, १९५०
केम्व्रिज हिस्ट्री अफ् इण्डिया—इ. जि. र्‍यापसन, भल्युम १, केम्व्रिज, १९२२
ग्रोण्डा जि—स्यान्स्क्रिट इन इन्दोनेशिया, नागपुर, १९५२
घोष वि—लिङ्गुइस्टिक् इन्ट्रोडाक्शन् टु स्यान्स्क्रिट, क्यालकाटा, १९३७
चक्रवर्त्ती पि. सि.—दि आर्ट अफ् ओयार इन एनसेण्ट इण्डिया, क्यालकाटा, १९४३
जयसोयाल के. पि.—हिन्दु पलिटि
टिप्निस् जि. जि.—कौटिल्य अर्थशास्त्रप्रदीप, वम्वे १९२३
तुलसीदास—रामचरितमानस, विजयकाली भट्टाचार्य, कलिकाता, वि. एस, १३६५
दीक्षितार आर. सि.—ओयार इन एनसेण्ट इण्डिया, म्याड्रास, १९४८
वन्द्योपाध्याय एन्. सि.—कौटिल्य, क्यालकाटा, १९२७
वसाक आर. जि.—अर्थशास्त्र (वेङ्गली ट्रानश्लेशन), क्यालकाटा, १९६४
" " —अशोकन् इन्स्क्रिप्शन्स्, क्यालकाटा, १९५९
" " —साम एग्रास्पेक्टस् अफ् कौटिल्यस् पलिटिकाल थिंकिं, वार्डओयान इउनिभार्सिटि, वार्डओयान, १९६७
वाशाम ए. एल.—दि ओयानडार ह्याट ओयाज् इण्डिया, लण्डन, १९५४
मजुमदार वि. के.—दि मिलिटारी सिस्टेम इन एनसेन्ट इण्डिया, क्यालकाटा, १९६०
मजुमदार एन्. जि.—इन्स्क्रिपशन् अफ् वेङ्गल, भल्युम ३

मजुमदार आर. सि.—करपोरेट लाइफ इन् एनसेण्ट इण्डिया, क्यालकाटा, १९२२
मुखार्जी रमारञ्जन एग्राण्ड माइति शचीन्द्रकुमार—करपास अफ् वेङ्गल इन्स्क्रिपशन्; क्यालकाटा, १९६७
म्याकडोनेल ए. ए.—ए वेदिक ग्रामार फर स्टुडेण्टस्, अक्सफोर्ड, १९५३
रायचौधुरी एइच्. सि.—पलिटिक्याल हिस्ट्री अफ् एनसेण्ट इण्डिया, क्यालकाटा, १९५०
राओ कृष्ण एम. इउ.—स्टाडिस् इन् कौटिल्य, माइशोर, १९५३
रेनो लुइस्—दि सिभिलाइजेशन् अफ् एनसेण्ट इण्डिया, १९५४
श्यामशास्त्री आर.—दि अर्थशास्त्र अफ् कौटिल्य (इंलिश ट्रानश्लेशन्), माइशोर, १९६७
श्यामशास्त्री आर.—इनडेक्स भारवेराम टु दि कौटिल्य अर्थशास्त्र, माइशोर, १९२३
सचाओ इ. सि.—आलवेरुणिस् इण्डिया, भल्युम १, २, लण्डन, १९०१
स्मिथ भि. ए.—आर्लि हिस्ट्री अफ् इण्डिया, अक्सफोर्ड, १९२४
हुइट्नि डाब्लु. डि.—ए स्यान्स्क्रिट् ग्रामार, लाइप्जिक् १९२४
हुल्टत्स् इ.—कर्पास इन्स्क्रिप्शनाम् इन्डिकारुम् भल्युम १

# शब्दसूची

पं स २०१ ]